

# सोमज्योतिः

**Shree Somnath Sanskrit University**

Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)

Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

University Newsletter

Issue: **17 & 18** Month: **December** Year: **2018**

Issue : 17 & 18 May 2018 - December 2018 Year : 2018-19


कुलपतिवाक्

## चित्तवातायनात् किञ्चित् ...



आत्मीयाः,

नमो नमः।

व्यावहारिकं २०१८ संख्याकं वर्षं समाप्तिमेति । तादृशम् अपरं २०१९ नामधेयं वर्षं देहल्या अपरस्मिन् पार्श्वे अन्तः प्रवेष्टुम् उन्मनो विद्यते। अचिरादेव उत्तरायणे भगवान् भास्करः संक्रमितुं सज्जोऽस्ति। कालातीतः सर्वकल्याणकारी भगवान् श्रीसोमनाथः चिदानन्दमयत्वेनात्मनः शिवत्वं सर्वथा वितन्वानः चकास्ति । एतस्मिन् संक्रान्त-संक्राम्यत्-संक्रमितव्यभूते काले समेषां भवतां हार्दम् अभिनन्दनम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य स्थापनाकालतः आदाय एतावत्पर्यन्तं भवतां निरन्तरं सत्प्रयासेन सौहार्द्येन आत्मीयभावनया च गुजरातप्रान्तस्य अद्वितीयोऽयं संस्कृतविश्वविद्यालयः महान्तमभ्युदयं प्राप्तवानस्तीत्यतः सर्वेऽपि भवन्तः अध्यापकाः छात्राः प्रशासकीयाः अधिकारिणः कर्मचारिगणश्च सुतरां वर्धापनीयाः सन्ति।

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी' इति गीतोक्त्या संस्कृतवाङ्मयविषये तद्गतशास्त्रसंरक्षण-संवर्धनादिसन्दर्भे तथा च श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य सर्वाङ्गीणाभ्युदयप्रसङ्गे निशाकालं मत्वा निद्रां गतेषु गच्छत्स्वपि अखिलेषु जनेषु संस्कृतसेवाव्रतिनां विश्वविद्यालयस्याऽस्य सेवकानाम् अस्मादृशानां निरन्तरं जागरणम् अपेक्ष्यत एव । एतस्मिन् जागरणेऽपि संयमः अस्माकं पाथेयं स्यादिति श्रीभगवान् उपर्युक्तपङ्क्तौ सङ्केतयतीव । तत्र संयमी जागर्ति इति यद्यपि वास्तविकस्थितेः कथनमस्ति, तथापि तत्र संयमेन विना जागरणेन अपेक्षिता इष्टसिद्धिः कदाचित् न स्यादिति सङ्केतो ग्रहीतुं शक्यते।

सोमज्योतिः वैशिष्ट्यद्वयं बिभर्ति प्रकाशः किं च उत्तापराहित्येन आह्लाद इति। अतः सोमज्योतिः इत्याख्ये विश्वविद्यालयस्यास्य मुखपत्रेऽस्मिन् गतमासेषु युवकमहोत्सवः, व्याकरणशास्त्रीयकार्यशाला, वृक्षारोपणम्, स्वच्छताभियानम्, सरदारवल्लभभाईपटेलमहोदयस्य ऐक्यप्रतिमायाः स्थापनम्, हैडलवर्ग-वुर्त्सवुर्ग इति जर्मनीदेशस्य विश्वविद्यालयद्वयेन सह शैक्षणिकः अभिबन्धः (MoU) इत्यादिभिः कृतैः कार्यैः विश्वविद्यालयस्य प्रकाशस्वरूपा शैक्षणिक-सांस्कृतिकप्रगतिः सविवरणं सचित्रं स्थानं लभते, तेन सह अखिलविश्वविद्यालयपरिसरे सर्वेषामपि छात्राध्यापकप्रशासक-कर्मचारिणां तथा च विश्वविद्यालयेन सह सम्बद्धानां महाविद्यालयानां शोधकेन्द्राणां च पक्षतः आह्लादरूपः उत्साहः दृश्यमानो विद्यते।

केनचित् पान्थेन बहुदूरं गन्तव्यं चेत् तदर्थं पर्याप्तं पुष्टं च पाथेयमपेक्ष्यते एव। संस्कृतजगतः तत्र च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कृते बहुकरणीयता बहुदूरगमनधैर्यशालिता च अपेक्षिते स्तः। किन्तु सर्वे मिलित्वा 'संगच्छध्वं संवदध्वम्' इति वैदिकमार्गमनुसृत्य चलामश्चेत् मार्गोऽपि सुगमो भविष्यति, अपेक्षिता सुपरिणतिरपि आगमिष्यतीति दृढो मे विश्वासः।

जयतु भगवान् श्रीसोमनाथः। जयतु संस्कृतम्। जयतु भारतम्।

**गोपबन्धुमिश्रः**

कुलपतिः

## श्रीसोमनाथसंस्कृतविश्वविद्यालयेन समाचरितः अन्ताराष्ट्रियोगदिवसः



विश्वविद्यापरिसरे प्रवृत्तस्य अन्ताराष्ट्रियोगदिवसस्य दृश्यम्

भारतसर्वकारस्य प्रचोदनात् अन्ताराष्ट्रियोगदिवसः जून-मासस्य एकविंशतितमे दिनाङ्के विश्वस्मिन् विश्वे जनैः आचर्यते। तदङ्गतया श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे २१.०६.२०१८ तमे दिनाङ्के प्रातः सप्तवादनात् अष्टवादनं यावत् अन्ताराष्ट्रियोगदिवसस्य आयोजनमभूत् । सामूहिकयोगकार्यक्रमेऽस्मिन् विश्वविद्यालस्य अनुस्नातकविभागच्छात्रैः सह संस्कृतमहाविद्यालयस्य छात्राः, विश्वविद्यालयाधिकारिणः, कर्मचारिणः वेरावलनगरस्य विभिन्नशालाभ्यः समागताः छात्राः, नागराश्च एकघण्टां यावत् सर्वकारनिर्दिष्टयोगाभ्यासे भागमगृह्णन्। कार्यक्रमस्य आरम्भः दीपप्रज्वालनेन समजायत। तदनु प्रासङ्गिकोद्बोधनं विदधानः कुलपतिचरः प्रो. अर्कनाथचौधरीवर्यः अवादीत् यत् योगः अनन्तकालात् प्रचलितः शारीरिकमानसिकाध्यात्मिकाभ्यासः अस्ति। विश्ववारा इयं भारतीयसंस्कृतिः भौतिकसुखस्य अपेक्षया आध्यात्मिकसुखाय अधिकं बलं यच्छति। यतो हि 'शरीरमाद्यं खलु धर्मसाधनम्' इत्योक्तरीत्या शरीरमेव आध्यात्मिकक्षेत्रे उन्नतिं कर्तुम् एकमात्रं साधनं वर्तते। अतः मनसः शान्त्यर्थं, शरीरस्य च स्वास्थ्य-सम्पादनाय भारतीयतत्त्वचिन्तकैः योगशास्त्रं रचितम्। अनेन योगशास्त्रेण मनसः शान्तिः शरीरस्य स्वस्थता च वैज्ञानिकरीत्या प्राप्यते । अस्मिन् योगाभ्यासकार्यक्रमे आहत्य ११४८ जनाः विभिन्नासनप्राणायामादीनाम् अभ्यासम् अकुर्वन्। डॉ. जयेशमुंगरावर्येण अत्र मञ्चसञ्चालनम् अक्रियत।



**Chief Editor**
Prof. Gopabandhu Mishra

**Publisher**
Dr. Dashrath Jadav

**Managing Editor**
Ravindra S. Kale

**Editor**
Dr. Janakisharan Acharya

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Bi-annual Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

**E-mail:** sssu.veraval@gmail.com

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि
''सोमज्योतिः'' द्रष्टुं शक्यते -
www.sssu.ac.in

Statement about the ownership and other particulars about newspapers
**SOMAJYOTIḤ**
**FORM IV**
(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

| | |
|---|---|
| 1. Place of the Publication | : Shree Somnath Sanskrit University Veraval, Gujarat – 362266 |
| 2. Periodicity of its Publication | : Bi-annual (Half-Yearly) |
| 3. Printer's Name | : H.K. Offset |
| Nationality | : Indian |
| Address | : 5, First Floor, Madresa Building, M.G.Road, Veraval, Gujarat-362265 |
| 4. Publisher's Name | : The Registrar |
| Nationality | : Indian |
| Address | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 5. Editor's Name | : Prof. Gopabandhu Mishra |
| Nationality | : Indian |
| Address | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |
| 6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital | : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266 |

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

## कुलपतिदैनन्दिनम्

| | |
|---|---|
| 06-10-2018 | President in an Inauguration Ceremony of 12th Youth Festival of Shree Somnath Sanskrit University, Veraval (Gujarat). |
| 08-10-2018 | President in the Valedictory Ceremony of 12th Youth Festival of Shree Somnath Sanskrit University, Veraval (Gujarat). |
| 09-10-2018 | Chairman in the meeting of Publication Committee and Research Committee of Shree Somnath Sanskrit University, Veraval. |
| 20-10-2018 | President in Principal's meet of this University in Darshanam Sanskrit Mahavidyalaya, Chharodi, Ahmedabad (Gujarat). |
| 20-10-2018 | President in an Academic Council Meet of this University in Darshanam Sanskrit Mahavidyalaya, Chharodi, Ahmedabad (Gujarat). |
| 20-10-2018 | President in an Executive Council Meet of this University in Darshanam Sanskrit Mahavidyalaya, Chharodi, Ahmedabad (Gujarat). |
| 22-10-2018 | Meeting with District Judge, Shri A.D.Mogal, Veraval. |
| 26-10-2018 | Vice-President in Sanskrit Bharati's All India Working Goshti, Varanasi. |
| 27/28-10-2018 | President in the Vidvat Parishad, Sanskrit Bharati All India Subdivision, Varanasi . |
| 01-11-2018 | Chairman in the meeting of Library Committee of Shree Somnath Sanskrit University, Veraval. |
| 06-11-2018 | Remained present in a Programme of Shri Shri Ravishankar at Somnath Trust, Somnath. |
| 07-11-2018 | Meeting with Shri A.S.Sundarmurty Sivam, Principal. |
| 22-11-2018 | Pre Submission Expert at Tripura University, Tripura. |
| 28-11-2018 | Chairman in the meeting of Finance Committee of Shree Somnath Sanskrit University, Veraval. |
| 29-11-2018 | Remained present in the meeting of Shri Aravind Joshi, Principal Secretary to Hon. Governor. |
| 29-11-2018 | Remained present in the meeting of Shri T.S.Joshi, Director, GCERT, Ahmedabad. |
| 30-11-2018 | Chief Guest in a National Seminar on 'संस्कृतसाहित्ये निरूपितानि मानवीयमूल्यानि' organized by Dr.Babasaheb Ambedkar Open University, Ahmedabad. |
| 01-12-2018 | Chief Guest in valedictory of 'राज्यस्तरीय शास्त्रीय स्पर्धा' organized by Vartantu Sanskrit Mahavidyalaya, Sola, Ahmedabad. |
| 06-12-2018 | Chairperson of Scrutiny Committee of Rashtriya Sanskrit Sansthan, New Delhi. |
| 07-12-2018 | Visited Brahmarshi Sanskar Dham, Nadiad. |
| 08-12-2018 | Remained present in a Cultural Programme of BAPS, Rajkot. |
| 11-12-2018 | Chaired the meeting of Finance Committee of Shree Somnath Sanskrit University, Veraval. |
| 12-12-2018 | Chaired the meeting of Executive Council of Shree Somnath Sanskrit University, Veraval. |
| 16-12-2018 | Remained present as Coordinator of Examination, Shalaka of Sanskrit Bharati, Varanasi. |
| 18-12-2018 | Special Appearance in a 'धातूद्देश्यकप्रक्रियाः - कार्यशाला' organized by Shree Somnath Sanskrit University, Veraval at Brahmarshi Sanskrit Mahavidyalaya, Nadiad. |
| 24-12-2018 | Special Guest in अखिल भारतीय अधिवेशन, संस्कृतभारती SMIAS, Kolavada, Gandhinagar. |
| 25-12-2018 | Chairman in a session of Competition on Shastra & Kavya held in अखिल भारतीय अधिवेशन, संस्कृतभारती , SMIAS, Kolavada, Gandhinagar. |

संस्कृतभारती-गुजरातस्य २४-२५ डिसेम्बर, २०१८ दिनाङ्कयोः कोलवडा गान्धिनगरे समायोजिते प्रान्तीये अधिवेशने मुख्यमन्त्रिणा श्रीमता विजयरूपाणी महोदयेन साकं माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः (वामचित्रे) गुजरातराज्यस्य शिक्षणमन्त्रिणा श्रीमता भूपेन्द्रसिंहचूडासमा महोदयेन साकं माननीयः कुलपतिः कुलसचिवश्च (दक्षिणचित्रे)





## ४९तमम् अखिल-भारतीय-प्राच्यविद्या-सम्मेलनम् (49th Session of AIOC)

भारतीयसंस्कृतेः संस्कृतस्य च संरक्षणाय प्राच्यविद्याः महत्त्वपूर्णं स्थानं भजन्ते। वेदवेदाङ्गवैदिकगणिताऽऽयुर्वेदयोगविज्ञानव्याकरणदर्शनसाहित्यपुराणेतिहासादिविषया ज्ञान-विज्ञानस्य स्रोतांसि वर्तन्ते। एतेषां शास्त्राणां संरक्षणाय नवीनगवेषणायै च प्रत्येकं वर्षद्वयान्तराले अखिलभारतीयप्राच्यविद्यासम्मेलनस्य आयोजनं क्रियते। इह भवति समागमो नैकेषां वेदवेदाङ्गोपनिषत्पुराणेतिहासधर्मशास्त्रदर्शनमीमांसाकाव्याऽऽयुर्वेदसङ्गणकराजनीतिशास्त्र-भौतिकरसायनजीवविज्ञानवनस्पतिशास्त्रपुरातत्त्वऽरबीपर्शियनगुर्जरभाषासाहित्यविषयविशारदानां समीक्षकाणां शोधार्थिनां तत्तच्छास्त्रपारङ्गतानां विदुषाम्। इमे हि विद्वांसः प्राच्यविद्यायाः नैकविषयेषु नवीनगवेषणां प्रस्तुत्य पारम्परिकज्ञानविज्ञानस्य आधुनिकयुगानुकूलव्याख्यां विधाय विद्वत्समवायं तोषयन्ति। गुजरातराज्ये अष्टादशवर्षानन्तरम् एतादृशस्य अतिविशिष्टस्य सम्मेलनस्य ४९तमस्य सत्रस्य आयोजनं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८, १९, २० मई २०१८ इति दिनाङ्केषु विश्वविद्यालयपरिसरे कृतमासीत्। अस्मिन् सम्मेलने वेद-वेदाङ्ग-साहित्य-अलङ्कार-दर्शन-पुराणेतिहास-अरबी-पर्शियन-गुर्जरसाहित्यादिविषयेषु ७०० अधिकानि तत्तच्छास्त्रनिष्णातैः चितानि शोधपत्राणि पठितानि। अस्य सम्मेलनस्य संयोजकरूपेण स्थानीयसचिवः प्रो. देवेन्द्रनाथपाण्डेयः, अतिरिक्तसचिवः डॉ. जानकीशरण आचार्यः आस्ताम्।

अस्य सम्मेलनस्य उद्घाटनकार्यक्रमः १८.०५.२०१८ तमे दिनाङ्के पूर्वाह्ने १० वादने प्रावर्तत। अस्मिन् उद्घाटनकार्यक्रमे उद्घाटकरूपेण गुजरातराज्यस्य मुख्यमन्त्रिचरः श्रीकेशुभाई पटेलवर्यः, मुख्यातिथिरूपेण गुजरातराज्यस्य शिक्षणमन्त्री श्रीभूपेन्द्रसिंह चूडासमावर्यः, अध्यक्षरूपेण कुलपतिचरः प्रो. अर्कनाथचौधरीवर्यः, विशिष्टातिथिरूपेण डॉ. पङ्कज जानीवर्यः, सम्मेलनाध्यक्षरूपेण प्रो. चन्द्रकान्त शुक्लः, सम्मेलनमहासचिवरूपेण प्रो. सरोजाभाटेमहोदया अन्ये च महानुभावाः उपस्थिताः सन्तः कार्यक्रमं व्यभूषयन्। स्थानीयसचिवः प्रो. देवेन्द्रनाथ-पाण्डेयः स्वागतभाषणं विधाय अखिलभारतीयप्राच्यविद्यासम्मेलनस्य प्रास्ताविकमपठत्। अस्मिन् सम्मेलने केचन विशिष्टाः कार्यक्रमाः अपि आयोजिताः आसन्। सांस्कृतिककार्यक्रमेषु १८.०५.२०१८ दिनाङ्के सायं प्रसिद्धशास्त्रीयनृत्याङ्गना डॉ. नलिनी जोषी भरतनाट्यं प्रास्तौत्। श्रीवीणापाणिसमूहद्वारा 'षोडशसंस्कारः' इत्याख्यं लोकप्रसिद्धं नाटकं प्रस्तुतं यच्च सर्वैः भृशं प्रशंसितम्। १९.०५.२०१८ तमे दिनाङ्के सारङ्गपुरस्थ-स्वामिनारायणसंस्कृतमहाविद्यालयच्छात्रैः अपि 'वीर शिवाजी' इत्याख्यं नाटकं प्रस्तुतम्।

अस्य सम्मेलनस्य एकम् एतदपि वैशिष्ट्यम् आसीत् यत् अत्र भारतस्य प्रसिद्धाः विद्वांसः १९.०५.२०१८ तमे दिनाङ्के आयोजितायां पण्डितपरिषदि भागं गृहीत्वा वाक्यार्थम् अकुर्वन्। प्रो. रामचन्द्रझा, प्रो. रामकुमार शर्मा, प्रो. ब्रजभूषण ओझा, प्रो. विष्णुप्रसाद महापात्रः, डॉ. अमृतलाल भोगायता, डॉ. वाचस्पतिमिश्र इत्यादिमनीषिणः व्याकरण-दर्शन-साहित्यादिविषयेषु यथासिद्धान्तं शास्त्रार्थविचारं प्रास्तुवन्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायण-शास्त्री अस्याः पण्डितपरिषदः अध्यक्षपदं व्यभूषयत्। अखिलभारतीयप्राच्यविद्यासम्मेलनाङ्गतया एकं कविसम्मेलनमपि आयोजितम्। पद्मश्रीरमाकान्तशुक्लवर्यस्य आध्यक्षे आयोजिते अस्मिन् कविसम्मेलने डॉ. राजेन्द्रत्रिपाठी 'रसराजः', डॉ. गौतमपटेलः, हर्षदेवमाधवः, प्रो. सरोजा भाटे प्रभृतयः कवयः स्वकाव्यकौशलेन उपस्थितश्रोतृगणम् अतूतुषन्।

अस्य समापनसमारोहः २०.०५.२०१८ दिनाङ्के पूर्वाह्ने समायोजितः। अत्र आशीर्वादप्रदातृरूपेण पूज्याः रमेशभाई ओझा वर्याः, मुख्यातिरूपेण सोमनाथ-न्यासस्य सचिवः श्री पी. के. लहरीवर्यः, विशेषातिथिरूपेण वेरावल-पाटणसंयुक्तनगरपालिका-प्रमुखः श्री जगदीश फोफण्डीवर्यः, रेयोन-उद्योगप्रमुखः श्री हरेन्द्रसिंह डांगरवर्यः, प्रो. अर्कनाथ चौधरी, प्रो. चन्द्रकान्तशुक्लः प्रो. सरोजा भाटे, प्रो. देवेन्द्रनाथ पाण्डेयः इत्यादिमहानुभावाः उपस्थिताः आसन्। अस्य सम्मेलनस्य अतिरिक्तस्थानीयसचिवेन डॉ. जानकीशरण आचार्येण अभ्यागतानां स्वागतं विधाय समग्रकार्यक्रमस्य सञ्चालनमकारि। प्रो. सरोजाभाटेवर्या विभिन्नसत्रेषु पुरस्काराय चितानां सर्वोत्तमशोधवाचकानां नामानि अघोषयत्। पूज्यभागवताचार्याः रमेशभाई-ओझावर्या स्वीयया गीर्वाणगिरा आशीर्वादप्रदानेन सर्वान् उपस्थितान् अतोषयन्। सम्मेलनस्यास्य समापनम् अतिरिक्तस्थानीयसचिवस्य डॉ. जानकीशरण आचार्यस्य धन्यवादज्ञापनेन अभवत्।



४९तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनम् उद्घाटयन्तः अतिथयः


सम्मेलने समुपस्थिताः प्रथिताः विद्वांसः कवयः मनीषिणश्च



सम्मेलनाङ्गतया प्रवृत्तस्य कविसम्मेलनस्य किञ्चन दृश्यम्


पण्डितपरिषदि वाक्यार्थप्रस्तुत्यर्थम् उपस्थिताः विद्वांसः


समापनसमारोहे मञ्चासीनाः श्रीरमेशभाई ओझावर्याः अन्ये च महानुभावाः

## विश्वविद्यालपरिसरे वृक्षारोपणकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य राष्ट्रिय-सेवा-योजना (N.S.S.) विभागपक्षतः किञ्च विश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयपक्षतः ०४.०८.२०१८ दिनाङ्के विश्वविद्यालये वृक्षारोपणकार्यक्रमः आयोजितः। अत्र विश्वविद्यालयस्य कुलपतिना सह सर्वे आचार्याः अधिकारिणः कर्मचारिणः छात्राश्च उपस्थिताः भूत्वा 'वृक्षाः सत्पुरुषा इव' इति ध्येयं मनसि निधाय सर्वोपकाराणां नैकविधवृक्षाणां रोपणं विश्वविद्यालयपरिसरे अकार्षुः। अस्य संयोजनं राष्ट्रिय-सेवा-योजनाविभागाधिकारी डॉ. रमेशचन्द्र-शुक्लः राष्ट्रिय-सेवा-योजना-कार्यक्रमसमन्वयकः डॉ. जयेशमुंगरा च अकुरुताम्।



## विश्वसिंहदिवसस्य आयोजनम्




समग्रे विश्वे ऑगस्टमासस्य दशमः दिनाङ्कः विश्व-सिंह-दिवसः इति रूपेण आचर्यते। गुजरातस्य गीर-अभयारण्ये तदङ्गतया श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन छात्रेषु नागरिकेषु च वनराजसिंहानां संरक्षणं किञ्च तान् प्रति जागरूकता सम्पादनाय १०.०८.२०१८ तमे दिनाङ्के विश्वसिंहदिवसः संवृत्तः आसीत् यत्र कार्यकारिकुलपतिचरः प्रो. महेन्द्रकुमारदवे, अनुस्नातक-विभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमार एल्. पण्ड्या, डॉ. जयेशमुंगरा किञ्च विश्वविद्यालयस्य सर्वे अध्यापकाः छात्राश्च स्वमुखे सिंहाकृतिं धृत्वा समूहयात्रामाध्यमेन सिंहसंरक्षणस्य सन्देशं प्रादुः।

## स्वातन्त्र्यदिवससमाचरणम्



परिसरे स्वातन्त्र्यपर्वणि ध्वजोत्तोलनस्य दृश्यम्

स्वातन्त्र्यदिवसमुपलक्ष्य १५.०८.२०१८ तमे दिनाङ्के श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे ७२तमं स्वातन्त्र्यपर्व समायोजि। अत्र तत्कालीनकार्यकारि-कुलपतिः प्रो. महेन्द्रकुमारदवे ध्वजोत्तोलनम् अकार्षीत्। सन्दर्भेऽस्मिन् सः उपस्थितजनान् भारतदेशस्य अखण्डतायाः संस्कृतेश्च रक्षणाय सम्भूय कार्यं कर्तव्यमिति संदेशं प्रादात्। दिवसेऽस्मिन् त्रिवेदि-हर्षलः शियाणी जयेशः, रादडिया रविः, देवांशी भिण्डे, यशवन्तपण्ड्या इत्यादिभिः छात्रैः विभिन्नाः सांस्कृतिककार्यक्रमाः प्रस्तुताः। सन्दर्भेऽस्मिन् कार्यक्रम-मार्गदर्शकः डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. देवेन्द्रनाथपाण्डेयः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे अन्ये च प्राध्यापकाः अधिकारिणः कर्मचारिणश्च समुपस्थिताः आसन्। कार्यक्रमसञ्चालनं डॉ. जयेशमुंगरा अकरोत्।



स्वातन्त्र्यदिने छात्रैः प्रस्तुतं नाटकमेकम्

## श्रीगोविन्दपटेलमहोदयस्य सन्मानकार्यक्रमः



सम्मानसमारोहे मञ्चासीनाः महानुभावाः

१.५.२०१८ तमे दिनाङ्के गुजरातप्रदेशसंस्कृतपाठशाला-अध्यापक-मण्डलस्य प्रमुखस्य श्रीगोविन्दपटेलमहाभागस्य सन्मानं श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य अनुस्नातक-भवनेन कृतम्। अत्र संस्कृता-ध्यापकमण्डलस्य नैकैः सदस्यैः पटेलमहाभागस्य कर्तृत्वविषये स्वीया भावना प्रकटिताः। ततश्च विश्वविद्यालय-पक्षतः अधिकारिभिरपि पटेलमहाभागस्य संस्कृतक्षेत्रे योगदानम् उपवर्णितम्। तदनु पटेलमहाभागस्य कर्तृत्वविषये प्रशस्तिपद्यगुच्छोपेता प्रशस्तिः पठिता। कार्यक्रमे अस्मिन् विश्वविद्यालस्य तत्कालीनकुलपतयः प्रो. अर्कनाथ चौधरीमहाभागाः अपि आशीर्वचांसि अवदन्।

## समाचरितं गुरुपूर्णिमापर्व

भारतीयपरम्परानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः २७.०७.२०१८ तमे दिनाङ्के गुरुपूर्णिमहोत्सवं समनुष्ठितवन्तः। अस्मिन् दिने विश्वविद्यालये छात्रैः वैदिकमङ्गलेन समारभ्य गुरुभिः सह भगवतः वेदव्यासस्य पूजनं समर्चनम् अक्रियत। ततः सभागृहे तत्कालीनकार्यकारिकुलपतिना सह सर्वैः गुरुभिः समुपस्थाय छात्राणां भावपुष्पार्चनम् अङ्गीकृतम्। तदनु छात्राः गुरुवन्दनं विधाय केचन गुरुपूर्णिमासम्बद्धान् स्वस्वविचारान् प्रत्यपादयन्। कार्यक्रमेऽस्मिन् सर्वेऽपि अध्यापकाः समुपस्थाय सर्वान् छात्रान् स्वाशीर्भिः अन्वगृह्णन्।

प्रसङ्गेऽस्मिन् अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, प्राचार्यः डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. देवेन्द्रनाथपाण्डेयः अन्ये च गुरवः छात्रेभ्यः आशीर्वचांसि व्यतन्वन्। गुरुपूर्णिमाख्यः कार्यक्रमोऽयं सम्पूर्णतया विश्वविद्यालयच्छात्रैः समायोजि। पूर्णतामन्त्रेण शान्तिमन्त्रेण च कार्यक्रमोऽयं समाप्तिम् अगात्।

## श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतसप्ताहोत्सवः



संस्कृतसप्ताहोत्सवस्य सम्पूर्तिसमारोहस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे २०.०८.२०१८ दिनाङ्कतः २७.०८.२०१८ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवः समायोजितः। सप्ताहोत्सवेऽस्मिन् बह्व्यः स्पर्धाः कार्यक्रमाश्च समायोजिताः विश्वविद्यालयेन। इमाः स्पर्धाः कार्यक्रमाश्च ज्ञानभाण्डागारस्य संस्कृतभाषायाः प्रसारे प्रचारे च अवश्यमेव उपयोगिनो भविष्यन्ति।

२०.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः विश्वविद्यालयस्य सभागारे सम्पन्नः। कार्यक्रमे मुख्यवक्तृरूपेण लालभाईदलपतभाईभारतीयसंस्कृतिविद्यामन्दिरस्य निदेशकः प्रो. जितेन्द्रशाहवर्यः समुपस्थितिं विधाय संस्कृतस्य महत्त्वविषये छात्रान् उद्बोधितवान्। स न्यगादीत् यत् संस्कृतभाषा सदाचारं बोधयन्ती सन्मार्गं प्रदर्शयन्ती सती जीवनलक्ष्यं प्रापयति। एतस्मिन्नवसरे वेरावल-पाटणसंयुक्त-नगरपालिकायाः अध्यक्षा श्रीमती मञ्जुलाबेन वी. सुयाणीमहोदया अपि उपस्थिता आसीत्। संस्कृतसप्ताहोत्सवेऽस्मिन् वेरावलतालुकाक्षेत्रस्थ-विभिन्नेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यश्च समागताः आहत्य २०० छात्राः विभिन्नासु स्पर्धासु भागमगृह्णन्। विश्वविद्यालयेन अस्मिन् सप्ताहोत्सवे विद्यालय-महाविद्यालयस्तरे रङ्गवल्ली, श्लोकगानम्, वक्तृत्वस्पर्धा, स्फूर्तिस्पर्धा, निबन्धलेखम्, कथाकथनम्, समूहगानम्, समस्यापूर्तिस्पर्धाः च समायोजिताः आसन्। यत्र छात्राः विभिन्नविषयेषु निबन्धलेखन-भाषणादिकं व्यधासिषुः।

२७.०८.२०१८ दिनाङ्के संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमे प्रो. महेन्द्रकुमारदवे, प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रकुमार पण्ड्या, श्रीसोमनाथन्यासस्य प्रबन्धकः श्रीविजयसिंहचावडा च समुपस्थिताः आसन्। विशिष्टातिथिरूपेण उद्बोधनं विदधानः श्रीविजयसिंहचावडा अकथयत् यत् संस्कृतभाषा राष्ट्रभावं प्रेरयति। तदनु मञ्चस्थाः महानुभावाः संस्कृतसप्ताहोत्सवे आयोजितासु स्पर्धासु विजेतृभ्यः छात्रेभ्यः पुरस्कारान् व्यतरन्। अस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमाररावल-शत्रुघ्नपाणिग्राहीमहोदयौ अकुरुताम्। इत्थं गुजरातराज्यस्य एकमेव संस्कृतविश्वविद्यालयेन संस्कृतसप्ताहोत्सवरूपेण संस्कृतभाषाया उत्तरोत्तरं विकासाय प्रचारप्रसाराय छात्राणाम् उत्साहवर्द्धनाय च नैरन्तर्येण संस्कृतसप्ताहोत्सवस्य आयोजनमिदं सुचारुतया क्रियते।

## श्रीडाकोर-संस्कृत-पाठशालायां व्याकरणशास्त्रपुनश्चर्याकार्यशाला



व्याकरणकार्यशालायां भाषमाणः डॉ. कृष्णप्रसादनिरौलामहोदयः

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसङ्कायः पारम्परिकशास्त्राणां संरक्षणाय संवर्धनाय अभ्यासाय च १० तः १२ सितम्बर २०१८ पर्यन्तं व्याकरणाभ्यासक्रमे प्रचाल्यमानस्य लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणं केन्द्रीकृत्य दिवसत्रयव्यापिनीमेकां कार्यशालां समायोजयत। कार्यशालेयं श्रीडाकोर-संस्कृत-पाठशालायाम् अभूत्। अस्यां कार्यशालायां विश्वविद्यालयसम्बद्धमहाविद्यालयेषु व्याकरणविषयस्य विद्वांसोऽध्यापकाः शोधच्छात्राश्च भागगृह्णन्। कार्यशालायामस्यां श्रीडाकोर-संस्कृत-पाठशालापक्षतः आवासस्य भोजनस्य च व्यवस्था कल्पिता। कार्यशालायेयं उद्घाटनसत्रेण आरब्धा समापनसत्रेण च पूर्णतां प्राप्ता। सम्पूर्णायायां कार्यशालायामस्यां दश व्याख्यानानि अभवन्। अत्र व्याख्यातॄणां नामानि तेषां विषयाः अधोलिखिताः सन्तिः-

| | | | | | |
|---|---|---|---|---|---|
| १. डॉ. वाचस्पति मिश्रः | - | चतुर्दशसूत्रेषु सन्ध्याद्यभावविचारः | २. डॉ. नरसिंह भोगायता | - | चतुर्दशसूत्र्यां श्रुतित्वविचारः |
| ३. डॉ. कृष्ण प्रसाद निरौला | - | रँ प्रत्याहारविचारः | ४. प्रो. विनोद कुमार झा | - | अन्योन्याश्रयदोषपरिहारविचारः |
| ५. श्री रविशंकर राजगोरः | - | उपदेशपदार्थविचारः | ६. डॉ. अर्जुन सामलः | - | ऊकालोऽज्झस्वदीर्घप्लुतः |
| ७. श्री योगेश पण्ड्या | - | तुल्यास्यप्रयत्नं सवर्णम् | ८. सन्दीप बी. पण्ड्या | - | पूर्वत्राऽसिद्धम् |
| ९. डॉ. क्षितीश्वरनाथ पाण्डेयः | - | अणुदित्सवर्णस्य चाऽप्रत्ययः | १०. डॉ. अश्विन भाई राजगोरः | - | वृद्धिरादैच् |

अत्र संयोजकत्वेन उतरदायित्वं प्रो. विनोद कुमार झा- डॉ. वाचस्पतिमिश्रौ तथा च स्थानीयसंयोजकत्वेन उतरदायित्वं डॉ. अजयभाई ठाकरमहोदयः अवहन्।

## प्रो. अर्कनाथचौधरीमहोदयस्य सौप्रस्थानिकसमारोहः



श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रो. अर्कनाथचौधरीमहोदयानां कुलपतित्वेन कार्यकालसमाप्तौ १२.०७.२०१८ तमे दिनाङ्के तेषां सौप्रस्थानिकसमारोहः समायोजितः। कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य आचार्याः अधिकारिणः कर्मचारिणः छात्राश्च उपास्थिताः आसन्। अवसरेऽस्मिन् प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमारझा, डॉ. नरेन्द्रकुमारपण्डया, प्रो. अर्चनादुबे, प्रो. महेन्द्रदवे अन्ये च अध्यापकाः महोदयं प्रति स्वप्रतिभावं प्रकटितवन्तः। कार्यक्रमे विश्वविद्यालयपक्षतः सर्वैः अध्यापकैः अधिकारिभिश्च आचार्येभ्यः अर्कनाथचौधरीवर्येभ्यः स्मृतिरूपेण प्रशस्तिपत्रादिकं समर्पितम्। श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य अभिवृद्धौ आचार्याणाम् अर्कनाथचौधरीमहोदयानां योगदानं महत्त्वपूर्णम् आसीत्। अतः आचार्याणाम् अग्रिमजीवनं स्वस्थं शुभमयं भवतु इति श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिवारः कामयते।

## विश्वविद्यालयपरिसरे UGC-NET/JRF, GSET प्रशिक्षणकेन्द्रस्य आरम्भः



प्रशिक्षणकेन्द्रस्य प्रास्ताविकं ज्ञापयन् कार्यक्रमसमन्वयकः प्रो. विनोदकुमारझावर्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालये Knowledge Consortium of Gujarat इति संस्थायाः सहयोगेन विश्वविद्यालयानुदानायोगायोजितायाः राष्ट्रियपात्रता-परीक्षायाः (NET), राज्यसर्वकारेणायोजितायाः राज्यस्तरीय-पात्रतापरीक्षायाः (SLET) च प्रशिक्षणं दातुं १८.०९.२०१८ तमे दिनाङ्के विश्वविद्यालयस्य सभागारे प्रशिक्षणशिबिरमुद्घाटितम्। अस्मिन् उद्घासटनकार्यक्रमे जे. एम. पानेरा महाविद्यालय-माणावदर इत्यस्य प्राचार्यः श्री महेश मैत्रा मुख्यातिथिपदं व्यभूषयत्। तत्कालीनः कार्यकारिकुलपतिः प्रो. महेन्द्रकुमारदवे कार्यक्रमेऽस्मिन् आध्यक्षं व्यभूषयत्।

कार्यक्रमस्यारम्भः छात्राणां वैदिक्या प्रार्थनया समभवत्। युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य सहसंयोजकेन डॉ. जानकीशरण आचार्येण समागतानाम् अतिथिनां स्वागतं व्याधायि तथा संयोजकेन प्रो. विनोदकुमारझावर्येण प्रास्ताविकं ज्ञापितम्। मुख्यातिथिपदेन वदता श्रीमहेशमैत्रावर्येण उच्चतरशिक्षाक्षेत्रे गुणवत्तामवाप्तुम् अनुष्ठीयमानानाम् उपायानां विषये प्रासङ्गिकमुद्बोधनं प्रदत्तं यत् श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन आरब्धमिदं प्रशिक्षणमवश्यं छात्राणां कृते ज्ञानार्जनाय उद्योगप्राप्तये च भविष्यति। प्रो. दवेवर्यः छात्राणां सर्वविधविकासाय विश्वविद्यालयेन प्रचाल्यमानान् कार्यक्रमान् विज्ञाप्य अस्य प्रशिक्षणकेन्द्रस्य महत्त्वं न्यगादीत्। कार्यक्रमस्यान्ते संजोजकः प्रो. विनोदकुमारझा धन्यवादभाषणम् अकरोत्। समग्रस्यास्य कार्यक्रमस्य सञ्चालनं युजीसी-नेट्/स्लेट्-प्रशिक्षणकेन्द्रस्य सहसंयोजकः डॉ. जानकीशरण आचार्यः अकरोत्।

## विश्वविद्यालयपरिसरे आयोजितं थैलासीमिया-परीक्षणम्



विश्वविद्यालयपरिसरे थैलासीमिया-परीक्षणस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागेन विश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयेन च १८.०९.२०१८ दिनाङ्के विश्वविद्यालयपरिसरे थैलासीमिया-परीक्षणशिबिरम् आयोजितम्। परीक्षणशिबिरेऽस्मिन् इण्डियन-रेड्क्रॉस-सोसायटी अहमदाबादतः अमित-श्रीवास्तवः किञ्च तस्य गणः विश्वविद्यालयछात्रान् थैलासीमिया-विषये सरलरीत्या अबोधयत्। डॉ. जयेशामुंगरावर्यस्य संयोजकत्वे आयोजितेऽस्मिन् शिबिरे ५९ छात्राणां रक्तपरीक्षणं थैलासिमीयापरीक्षणञ्च कृतम्।

## चन्द्रमौलिच्छात्रावासे समनुष्ठितः गणेशोत्सवः

'कलौ चण्डीविनायकौ' इत्युक्तिः सम्प्रति सार्थकतां गता दृश्यते। प्रतिवर्षमिव अस्मिन्नवर्षे भाद्रपदमासे शुक्लपक्षे चतुर्थीतः आरभ्य नवमीं यावत् तदनुसारं १३.०९.२०१८ तः १७.०९.२०१८ पर्यन्तं श्रीसोमनाथ-संस्कृतविश्वविद्यालस्य चन्द्रमौलिच्छात्रावासे सानन्दं छात्रैः गणेशोत्सवः समाचरितः। अस्मिन् पञ्चदिनात्मके गणेशोत्सवे प्रातः सायं च गणेशस्य पूजनं गुरुभिः छात्रैश्च सम्भूय अक्रियत। गणेशोत्सवस्य अयं सम्पूर्णः कार्यक्रमः अध्यापकानां मार्गदर्शने छात्रैः सम्पादितः। पञ्चमे दिने छात्रैः भगवतः गणेशस्य प्रतिमायाः विसर्जनं समुद्रप्रवाहे कृतम्। अत्र गणेशप्रतिमायाः इदं वैशिष्ट्यम् आसीत् यत् अस्याः समुद्रे विसर्जनेन न कापि पर्यावरणहानिः अभूत्।

## श्रीसोमनाथसंस्कृतविश्वविद्यालये सरदार-वल्लभभाई-पटेलस्य प्रतिमायाः प्रतिष्ठापनकार्यक्रमः



प्रतिमाप्रतिष्ठापनकार्यक्रमे मञ्चासीनाः कुलपतयः अन्ये च महानुभावाः

गुजरातराज्यस्य शिक्षणविभागस्य निर्देशानुसारं गुजरातस्य प्रायः सर्वेषु विश्वविद्यालयेषु लोहपुरुषस्य सरदारवल्लभभाई-पटेलस्य प्रतिमाः प्रतिष्ठापिताः। तस्मिन्नेव उपक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽपि सरदारपटेलस्य प्रतिमा आनीता। तस्याः स्थापनाय सुन्दरः मञ्चोऽपि विश्वविद्यालयस्य शैक्षणिकभवनस्य सभागृहे निर्मितः। अस्याः प्रतिमायाः प्रतिष्ठापनं २१.१२.२०१८ दिनाङ्के जातम्।

बीजनिगमस्य प्रमुखः श्रीराजशीभाई जोटवाणी, विश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रः, भारतीयजनतादलस्य नरगप्रमुखः श्रीप्रवीणभाई रूपारेलिया, मामलतदारः श्री डी.बी. आम्बलियामहोदयश्च उपस्थाय कार्यक्रमस्यास्य शोभां वर्धितवन्तः। अन्येऽपि नैके नगरश्रेष्ठिनः ऐतिहासिकेऽस्मिन् कार्यक्रमे समुपातिष्ठन्।

मुख्यातिथिना श्रीमता जोटवामहोदयेन स्वीये भाषणे उक्तं यत् श्रीमता सरदारपटेलेन स्वतन्त्रभारतस्य प्रायः ५६२ खण्डान् संयोज्य सम्प्रतिविद्यमानं स्वरूपं साधितम्। स्वीये आध्यक्षीयभाषणे कुलपतिचरणैः ''सरदारपटेलः पश्चिमात् समुदितः सूर्यः एव अस्ति'' इति सगौरवं प्रतिपादितम्। भाषणान्ते समुपस्थिताः सर्वेऽपि जनाः सरदारपटेलस्य चरणयोः पुष्पाञ्जलिं समार्पयन्। कार्यक्रमेऽस्मिन् सभासञ्चालनं डॉ. दीपेशकतिरा अकरोत्।

## प्रो. गोपबन्धुमिश्रवर्याणां श्रीसोमनाथसंस्कृतविश्वविद्यालये अभिनन्दकार्यक्रमः


अभिनन्दनकार्यक्रमे मञ्चासीनाः कुलपतयः अन्ये च आचार्याः

प्रो. अर्कनाथचौधरीवर्यस्य १३.०८.२०१८ तमे दिनाङ्के कुलपतित्वेन कार्यकाल-समाप्त्यनन्तरं गुजरातराज्यसर्वकारेण १८.०९.२०१८ तमे दिनाङ्के श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य नूतनकुलपतिरूपेण काशीहिन्दूविश्वविद्यालयस्य संस्कृतविभागस्य आचार्याणां गोपबन्धु मिश्रवर्याणां नियुक्तिः कृता।

१३.१०.१९५९ दिनाङ्के उत्कलप्रदेशस्य बिरुडाग्रामे जनिं प्राप्ताः 'विद्यावाचस्पतिः' इत्यादिभिः उपाधिभिः मण्डिताः श्रीमन्तः प्रो. गोबन्धुमिश्रमहोदयाः देशे विदेशे च अत्यन्तं प्रसिद्धाः वैयाकरणाः सक्रियाश्च संस्कृतकार्यकर्तारः सन्ति। एते १९८६ तमे वर्षे पटनाविश्वविद्यालयेन 'परिभाषेन्दुशेखरः (प्रथमप्रकरणम्) - समीक्षात्मकमध्ययनम्' इति विषये विद्यावारिधिपदव्या सम्मानिताः किञ्च २००४ तमे वर्षे वीरकुँवरसिंहविश्वविद्यालयेन 'पाणिनीय कृत प्रत्ययों का विवरणात्मक एवं विश्लेषणात्मक अध्ययन' इति विषये विद्यावाचस्पतिः (D.Litt.) इति उपाधिना सभाजिताः। २००४ तमे वर्षे काशीहिन्दूविश्वविद्यालयस्य संस्कृतविभागे उपाचार्यरूपेण समागत्य तत्रैव २००५ तमे वर्षे आचार्यपदे प्रोन्नतिं समवाप्य अमी २४.१०.२०१३ तः २३.१०.२०१६ पर्यन्तं संस्कृतविभागाध्यक्षपदमपि व्यभूषयन्। एते ४.१०.२०१० दिनाङ्के Indian Council for Cultural Relations (ICCR) इति संस्थया चिताः भूत्वा वर्षद्वयं यावत् फ्रांसदेशे पेरिसनगरे Sorbonne Nouvelle विश्वविद्यालये संस्कृतविषयस्य अतिथि-आचार्यरूपेण (Visiting Professor) नियुक्ताः आसन्। एभिः आचार्यैः संस्कृतप्रचाराय प्रसाराय च जर्मनी, बेल्जियम, नीदरलैण्ड, स्वीजरलैण्ड, आस्ट्रिया, इटैली, ब्रिटैन इत्यादिदेशाना भ्रमणं कृतम्। अपि च एते फ्राँसदेशेन HIRAYAMA इति अन्ताराष्ट्रियपुरस्कारेण, उत्तरप्रदेशसंस्कृतसंस्थानेन 'विशिष्टपुरस्कारः' इति बिरुदेन तथा च ज्ञानसिंहासनं-वाराणसीपक्षतः 'आचार्य-व्रजवल्लभद्विवेदी शैवभारतीपुरस्कारः' इत्यादिभिः पुरस्कारैः सभाजिताः सन्ति। अमीषामाचार्याणां मार्गदर्शने २८ शोधार्थिभिः विद्यावारिधिः इति पदवी प्राप्ता। एभिः वैयाकरणैः सप्त पुस्तकानि विरचितानि यत्र 'पुरस्तात् पैरिस्' इति प्रसिद्धं यात्रावृत्तान्तपुस्तकमपि समाविष्टमस्ति। एवमेव एतेषां वैदुष्यपूर्णानि शोधपत्राणि, सम्पादिताः नैके ग्रन्थाः, सस्कृते लघुकथाग्रन्थाः, संस्कृतनाटकानि, संस्कृते अनूदिताः ग्रन्थाः अपि विद्वत्समवायं संस्कृतजगच्च तोषयन्ति। प्रो. मिश्रमहाभागाः 'Le Petit Prince' इति फैंचभाषायां निबद्धस्य विश्वप्रसिद्धस्य पुस्तकस्य संस्कृतानुवादं 'कनीयान् राजकुमारः' शीर्षकेण किञ्च हिन्दीभाषातः पुस्तकमेकं 'वीरव्रतं परमसाधनम्' इति संस्कृते अनूद्य प्राकाशन्त। प्रो. गोपबन्धुमिश्रमहाभागाः संस्कृते गुणवत्तापूर्णशोधलेखप्रकाशनाय संस्कृतप्रसारपरिषदा प्रकाशिताम् 'आरण्यकम्' इति संस्कृत-रिसर्च-जर्नल्' शोधपत्रिकामपि सम्पादयन्ति।

प्रो. गोपबन्धुमिश्रमहाभागैः २४.०९.२०१८ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये स्वीयकौलपत्यदायित्वं गृहीतम्। तस्मिन् दिने सायं विश्वविद्यालयस्य सभागारे तेषाम् अभिनन्दनकार्यक्रमः समजायत। तत्र तत्कालीनः कार्यकारिकुलपतिः प्रो. महेन्द्रकुमार दवे, अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार एलु. पण्ड्या, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्रो. विनोदकुमार झा, तत्कालीनः उपकुलसचिवः डॉ. दशरथजादवः तथा च विश्वविद्यालयस्य सर्वे अध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। सर्वादौ प्रो. गोपबन्धुमिश्रवर्याणां प्रो. महेन्द्रकुमारदवेमहाभागेन स्वागतं विहितम्। अस्मिन्नवसरे प्रो. पाण्डेयः तथा च डॉ. पण्ड्यामहाभागः अपि कुलपतिविषये स्वप्रतिभावं उक्त्वा नवागतेभ्यः कुलपतिभ्यः स्वागतं व्याहरताम्। स्वीये प्रासङ्गिकोद्बोधने प्रो. मिश्रमहाभागेन उक्तं यत् कुलपतित्वेन मम कार्यकालस्य प्रत्येकं क्षणः विश्वविद्यालयहितचिन्तनाय विश्वविद्यालयविकासाय च भविष्यति। नूतनेऽस्मिन् विश्वविद्यालये संस्कृतविकासस्य, छात्राणां स्तरवर्धनस्य, उच्चतरसंशोधनस्य च महदवसरः वर्तते। अतः सर्वेषां सहयोगेन विश्वविद्यालयोऽयं नूनं गौरवं प्राप्स्यतीति। अस्य अभिनन्दनकार्यक्रमस्य सञ्चालनं डॉ. दीपेश कतिरा अकरोत्।

## ब्रह्मर्षिधाम्नि समायोजिता पुराणेतिहासधर्मशास्त्रानुसन्धानकार्यशाला


कार्यशालायाः उद्घाटनस्य कानिचन दृश्यानि

वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयः किञ्च नडियादस्थ-ब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तसहकारेण २६.०९.२०१८ दिनाङ्कतः २८.०९.२०१८ पर्यन्तं ब्रह्मर्षिसंस्कार-धामपरिसरे विश्वविद्यालयस्य पुराणसङ्कायेन पुराणेतिधर्मशास्त्रानुसन्धानकार्यशाला समायोजि। एतस्याः संस्थायाः प्रमुखविश्वस्तैः पद्मश्रीडाह्याभाईशास्त्रिमहोदयैः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरणैः आचार्यैः गोपबन्धुमिश्रमहोदयैः प्रधानाचार्यचरैः डॉ. कृष्णप्रसादनिरौलामहोदयैः च स्वीयगरिममयोपस्थित्या कार्यशालेयं साफल्यं प्रापिता। वाल्मीकीयरामायणम् अधिकृत्य विविध-विद्वद्भिरस्यां कार्यशालायां सरसव्याख्यानानि अदियन्त।

साधुः श्रुतिप्रकाशदासः, डॉ. वसन्तकुमारभट्टः, डॉ. वसन्तभाईपरिखः, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमाररावल, डॉ. शान्तिकुमारपण्ड्या, श्रीजितेन्द्रकुमारव्यास, श्रीभद्रेशभाईव्यासः, डॉ. अमृतलाल भोगायता तथा च अन्ये विद्वांसः इमां कार्यशालां शास्त्रगर्भितैः स्वव्याख्यानैः व्यभूषयन्। विविधमहाविद्यालयेभ्यः प्राध्यापकाः अपि अत्र भागमगृह्णन् किञ्च छात्रैः अपि व्याख्यानश्रवणमक्रियत।








## સોમનાથ સંસ્કૃત યુનિ.માં વૃક્ષારોપણ :

વેરાવળમાં આવેલ સોમનાથ સંસ્કૃતિ શ્રીન.માં એન.એસ.એસ. વિભાગ અને સોમનાથ સંસ્કૃત યુનિ.સંચાલીત સંસ્કૃત કોલેજ દ્વારા આજરોજ વૃક્ષારોપણ કાર્યક્રમનું આયોજન કરવામાં આવેલ જેમાં કુલપતિ પ્રો.મહેન્દ્રકુમાર દવે, અનુ.વિભાગના અધ્યક્ષ, પ્રાધ્યાપકો, અધિકારીઓ, બિન શૈક્ષણિક કર્મચારીઓ અને બધા વિદ્યાર્થીઓ હાજર રહી માનવ માત્રના આધારરૂપ એવા વૃક્ષોનું વૃક્ષારોપણ કરવામાં આવેલ હતું. આ કાર્યક્રમના સંયોજન તરીકે એન.એસ.એસ. પ્રોગ્રામ કો-ઓર્ડીનેટર ડૉ.જયેશકુમાર મુંગરાએ કામગીરી ...ાર – વેરાવળ)

## વેરાવળ શહેરની સંસ્કૃત કોલેજમાં વૃક્ષારોપણ, જતનનો કરાયો સંકલ્પ



વેરાવળ | વેરાવળમાં આવેલ સંસ્કૃત કોલેજ ખાતે છાત્રોએ વિવિધ જાતનાં વૃક્ષોનું વાવેતર કરી જતન કરવાનો સંકલ્પ લીધો હતો. આ તકે ડૉ.જયેશકુમાર, પ્રો.મહેન્દ્રકુમાર દવે સહિતનાં ઉપસ્થિત રહયાં હતાં.

संस्कृतम् विशेष: — સૌરાષ્ટ્રની રફતાર

## 'ભાષા' યુદ્ધ વચ્ચે અડીખમ દેવભાષા સંસ્કૃત

સંસ્કૃતને વૈશ્વિક બનાવવા સોમનાથ યુનિ.ના ફ્રેન્ચ-જર્મન સાથે કરાર



## વેરાવળઃ સોમનાથ સંસ્કૃત યુનિ.દ્વારા યોગ દિન ઉજવાયો



# वृत्तदर्पणे श्रीसोमनाथसंस्कृतविश्वविद्यालयः



## સોમનાથ સંસ્કૃત યુનિવર્સિટીનાં પરિસરમાં 1148 લોકોએ યોગ સાધના કરી





## વેરાવળમાં સંસ્કૃત સપ્તાહની ઉજવણી

સંસ્કૃત યુનિવર્સિટી દ્વારા વિવિધ સ્પર્ધાઓ યોજાઈ



## સંસ્કૃત ભાષાની અને સંસ્કૃતિની રક્ષા વિના રાષ્ટ્રની રક્ષા અસંભવ



## સોમનાથ સંસ્કૃત યુનિ.માં વૃક્ષારોપણ :

## સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં સંસ્કૃત સપ્તાહ મહોત્સવ યોજાયો



સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં સંસ્કૃત સપ્તાહ મહોત્સવ યોજાયો હતો અને વિવિધ સ્પર્ધાઓ યોજાતાં યુનિ.નાં 110 છાત્રો તેમજ વેરાવળની માધ્યમિક શાળાઓનાં 40 જેટલા છાત્રોએ ભાગ લીધો હતો અને વિજેતાં સ્પર્ધકોને ઇનામો આપી પ્રોત્સાહિત કરવામાં આવ્યા હતાં.

## એમફીલમાં 209, પીએચડીમાં 78 છાત્રોએ પ્રાચીનગ્રંથોનું કર્યું સંશોધન



## मान्यानां कुलपतीनां प्रो. गोपबन्धुमिश्रमहाभागानां विश्वविद्यालये शोधरतैः शोधच्छात्रैः सह मेलनम्







# श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य द्वादशो युवमहोत्सवः-२०१८



युवमहोत्सवोद्घाटनकार्यक्रमे मञ्चस्थैः महानुभावैः पुस्तकलोकार्पणम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं विश्वविद्यालय-स्तरीयः युवमहोत्सवः समायोज्यते। ऐषमः द्वादशः युवमहोत्सवः ०६.१०.२०१८ दिनाङ्कात् ०६.१०.२०१८ दिनाङ्कं यावत् विश्वविद्यालयस्य परिसरे भव्यतया समपादि। श्रीसोमनाथ-संस्कृतविश्वविद्यालसंलग्नेभ्यः विविधेभ्यः महाविद्यालयेभ्यः ४०० अधिकाः छात्राः अत्र शैक्षिक-चित्र-सांस्कृतिक-क्रीडास्पर्धादिषु भागम् अग्राहिषुः। षष्ठे दिनाङ्के प्रातः तत्तन्महाविद्यालयवेषभूषणैः अलङ्कृतानां महाविद्यालयीयानां छात्राणां मान्यानां कुलपतीनाम् आचार्याणां गोपबन्धुमिश्र-महाभागानां मार्गनिर्देशने टावरचौकतः विश्वविद्यालयपरिसरं पर्यन्तं सांस्कृतिशोभायात्रा सम्पन्ना। अनया सह ध्वजारोहणकार्यक्रमः सर्वेषाम् अध्यापकानां, संयोजकानां निर्णायकमण्डलिप्रमुखानां कुलपतीनाञ्च उपस्थितौ विश्वविद्यालयपरिसरे समजनि।

तदनु अस्य द्वादशस्य युवमहोत्सवस्य उद्घाटनकार्यक्रमः ०६.१०.२०१८ तमे दिनाङ्के सम्पन्नः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन गुजरातराज्यस्य सुप्रसिद्धः साहित्यकारः प्रि. डॉ. हसित मेहता महोदयः तथा च स्वर्णिम-गुजरात-स्पोर्ट्स्-विश्वविद्यालस्य कुलपतिः डॉ. जतिन सोनी, अध्यक्षत्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः, श्रीलखमभाई भैंसला, श्रीरीतेशभाई फोफण्डी च उपस्थिताः अभूवन्। प्रास्ताविकं विदधानः प्रो. महेन्द्रकुमार दवे अभ्यागतानां स्वागतम् अकरोत्। अथ विश्वविद्यालयस्य योगविभागीयच्छात्राभिः मनोहरं योगप्रदर्शनं प्रादर्शि। उद्घाटनकार्यक्रमान्ते युवमहोत्सवस्य मुख्यसंयोजकः डॉ. जयेशमुंगरा धन्यवादज्ञापनं प्राकटयत्।

अस्मिन् द्वादशे युवमहोत्सवे दिनत्रयं बहवः स्पर्धाः समजायन्त। सांस्कृतिकस्पर्धासु एककसंस्कृतगीतम्, एककशास्त्रीयवादनम्, एककशास्त्रीयगानम्, एककशास्त्रीयनृत्यम्, सङ्घनृत्यम्, एकपात्राभिनयश्च अवर्तन्त। एवमेव चित्रस्पर्धासु आशुचित्रणम्, व्यङ्ग्यचित्रणम् आस्ताम्। शैक्षिकस्पर्धासु सुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचनास्पर्धा, आशुभाषणम्, क्रीडास्पर्धासु योगासनम्, मल्लयुद्धम्, धावनम्, कबड्डी, कूर्दनम्, चतुरङ्गम्, हस्तकन्दुकम् इत्यादिस्पर्धाः समभूवन्। एतासु स्पर्धासु छात्रैः मनोहराणि संस्कृतनाटकानि अभ्यनीयन्त। भाषण-वादविवाद-साहित्यरचनादिभिः स्पर्धाभिः छात्राः स्वप्रातिभं प्रादर्शयन्। अष्टमे दिनाङ्के प्रातः युवमहोत्सवसंयोजकस्य डॉ. जानकीशरण-आचार्यस्य स्फूर्तिस्पर्धासञ्चालनेन सार्धहोराद्वयव्यापिनी स्फूर्तिस्पर्धा समभूत् यत्र आन्तं छात्राः अनया रसप्रदस्पर्धया रसान्विताः अभूवन्। अस्मिन् युवमहोत्सवे निर्णायकरूपेण प्रथितविद्वांसः क्रीडापटवश्च निर्णायकरूपेण समागुः।



युवमहोत्सवस्य समापनकार्यक्रमे उपस्थिताः महानुभावाः

अष्टमे दिनाङ्के अपराह्णे समापनसमारोहः पुरस्कारविरण-कार्यक्रमश्च समायोजितः। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रवर्याः आध्यक्ष्यं निरवहन्। सोमनाथन्यासस्य सचिवाः श्री पी.के. लहरी महभागाः विशिष्टातिथिरूपेण उपस्थाय सर्वान् अन्वगृह्णन्। कार्यक्रमस्य आरम्भः विश्वविद्यालयच्छात्रैः कृतया वैदिक्या प्रार्थनया दीपप्राकट्येन च समजायत। तदनु द्वादश-युवमहोत्सवस्य संयोजकः डॉ. जानकीशरण आचार्यः अस्य युवमहोत्सवस्य प्रास्ताविकम् उद्देश्यं विवरणञ्च प्रास्तौत्। तदनु मुख्यातिथिरूपेण श्रीमन्तः पी. के. लहरीमहाभागाः अवादिषुः यत् छात्राणां सहजायाः प्रतिभायाः प्रकटीकरणाय एतादृशः युवमहोत्सवः नितराम् उपकारकोऽस्ति। कुलपतिवर्यैः आचार्यैः गोपबन्धुमिश्रमहाभागैः भणितं यत् अयं युवमहोत्सवः स्वजीवने साफल्यं प्राप्तुम् अस्मान् प्रेरयति। कार्यक्रमे मञ्चस्थमहानुभावाः विश्वविद्यालयाधिकारिकर्मचारिणश्च विजेतृभ्यः पुरस्कारवितरणं कृत्वा अन्वह्णन्। अस्मिन् द्वादशे युवमहोत्सवे आयोजितासु स्पर्धासु सर्वाधिकान् १११ अङ्कान् अवाप्य श्रीवरतन्तुसंस्कृतमहाविद्यालयः विजयवैजयन्त्या व्यभूषयत्। श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरच्छात्राः ११० अङ्कान् समवाप्य उपविजयवैजयन्त्या सभाजिताः। कार्यक्रमान्ते तत्कालीनाः कार्यकारिकुलसचिवाः प्रो. महेन्द्रकुमारदवेवर्याः सफलतया सम्पादितस्य कार्यक्रमस्यास्य सहकारं प्रदत्तवद्भ्यः आर्थिकरूपेण सहयोगं प्रदातृभ्यश्च धन्यवादान् प्राचीकटन्। अस्य समग्रस्य द्वादशयुवमहोत्सवस्य मुख्यसंयोजकरूपेण डॉ. जयेशमुंगरा, संयोजकरूपेण डॉ. जानकीशरण आचार्यः, श्रीरविन्द्रकालेमहोदयश्च स्वीयम् उत्तरदायित्वं निरवाक्षुः। इत्थञ्च यूनां महोत्सवोऽयं युवमहोत्सवः सफलतया समजायत।












# द्वादशे युवमहोत्सवे विजयिनां सूची -

### 100 M

| | | |
|---|---|---|
| 1 | TRIVEDI PARTH DHARMESHBHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI DIVYESHKUMAR M | NSM, VYARA |
| 3 | JOSHI DILIP ANANDBHAI | SAVSM, DHORIVAV |

### 100 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | GAMIT SNEHAKUMARI CHANDUBHAI | NSM, VYARA |

### 200 M

| | | |
|---|---|---|
| 1 | PANDYA AJAY RAMESHBHAI | SVSM, SOLA |
| 2 | MAHETA KULDEEP VIJAYBHAI | SBSM, PORBANDAR |
| 3 | TRIVEDI VRAJESH RAJESHBHAI | V.T. CHOKSI SM, SURAT |

### 200 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI VANDANABAHEN NANUBHAI | NSM, VYARA |

### 400 M

| | | |
|---|---|---|
| 1 | GAMIT JIGNESHBHAI GOPALBHAI | SSSU- VERAVAL |
| 2 | VARNAVA SUKHDEV RAMESHBHAI | SNSM, PETLAD |
| 3 | MODH MUKESH BALADEVBHAI | SASM, AMBAJI |

### 400 F

| | | |
|---|---|---|
| 1 | CHAUDHARI SUNITAKUMARI CHAMPAKBHAI | SSSU- VERAVAL |
| 2 | GAMIT PAYALBEN YOGESHBHAI | NSM, VYARA |

### 1500 M

| | | |
|---|---|---|
| 1 | BHATT HARSHDEEP SHANTILAL | SBSM, PORBANDAR |
| 2 | SHUKLA NIRAV LALITBHAI | SVSM, SOLA |
| 3 | PANDYA URVISH MUKESHBHAI | SAVSM, DHORIVAV |

### CHESS M

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| 2 | VYAS PARTH NARESHBHAI | V.T. CHOKSI SM, SURAT |
| 3 | RAVAL SACHIN PRADYUMNBHAI | SNSVP, BHARUCH |

### CHESS F

| | | |
|---|---|---|
| 1 | KACHCHHAVA VARSHABA PRATAPBHAI | SSSU- VERAVAL |
| 2 | GAMIT SNEHAKUMARI CHANDUBHAI | NSM, VYARA |

### YOGA M

| | | |
|---|---|---|
| 1 | GAMIT VIRALKUMAR NAVINBHAI | SSSU- VERAVAL |
| 2 | JOSHI MEHUL D | SBSM, NADYAD. |
| 3 | JOSHI ASHISHBHAI JAYANTIBHAI | SBVSSM (B.ED.),SOLA |

### YOGA F

| | | |
|---|---|---|
| 1 | VALA ALPA RAJABHAI | SSSU- VERAVAL |
| 2 | GAMIT RAVINABEN BALUBHAI | NSM, VYARA |

### WRESTLING KG 50

| | | |
|---|---|---|
| 1 | JOSHI MEHUL D | SBSM, NADIYAD |
| 2 | SHUKLA SHRIDHAR HARSHADBHAI | SVSM, SOLA |
| 3 | AUVDICHYA RONAK V | SBYVSM, MUDETI |

### WRESTLING KG 55

| | | |
|---|---|---|
| 1 | JOSHI KISHAN R. | SBYVSM, MUDETI |
| 2 | JOSHI KIRAN KANJIBHAI | SNSVP, BHARUCH |
| 3 | JANI AMIT MAHESHBHAI | SVSM, SOLA |

### WRESTLING KG 60

| | | |
|---|---|---|
| 1 | DUBE SAGAR SUNIL | SVSM, SOLA |
| 2 | JOSHI ASHISHBHAI JAYANTIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | JOSHI GOVIND | SBYVSM, MUDETI |

### WRESTLING KG 66

| | | |
|---|---|---|
| 1 | DAVE JAYDEV VINUBHAI | SVSM, SOLA |
| 2 | JOSHI AJAY JAMNASHANKAR | SBVSSM (B.ED.),SOLA |
| 3 | JANI MILAN N | SBSM, NADIYAD |

### WRESTLING KG 74

| | | |
|---|---|---|
| 1 | TRIVEDI SACHIN SHRIRAMBHAI | SVSM, SOLA |
| 2 | JOSHI AMIT DHEERAJLAL | SNSVP, BHARUCH |
| 3 | PANDYA SAGARKUMAR S | SBSM, NADIYAD |

### DISK THROW M

| | | |
|---|---|---|
| 1 | BHATT VRAJESH JAYDIPBHAI | SVSM, SOLA |
| 2 | JOSHI DILIP ANANDBHAI | SAVSM, DHORIVAV |
| 3 | JOSHI OMKAR VISHNUBHAI | SSRSM, AHMEDABAD |

### DISK THROW F

| | | |
|---|---|---|
| 1 | CHAUDHARI SANDHYAKUMARI KOTLABHAI | SSSU- VERAVAL |
| 2 | GAMIT PRATIKSHABEN INTABHAI | NSM, VYARA |

### SHOTPUT M

| | | |
|---|---|---|
| 1 | BHATT VRAJESH JAYDIPBHAI | SVSM, SOLA |
| 2 | JOSHI NIRAV H | SBSM, NADIYAD |
| 3 | JOSHI JAYDEV DAYASHAKAR | SSRSM, AHMEDABAD |

### SHOTPUT F

| | | |
|---|---|---|
| 1 | RAM DHRUTIBEN JADAVBHAI | SSSU- VERAVAL |
| 2 | GAMIT PAYALBEN YOGESHBHAI | NSM, VYARA |

### HIGH JUMP M

| | | |
|---|---|---|
| 1 | GAMIT VIRALKUMAR NAVINBHAI | SSSU- VERAVAL |
| 2 | PANDYA MITUL BHARATBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDYA MEHUL NARESHBHAI | SVSM, SOLA |

### HIGH JUMP F

| | | |
|---|---|---|
| 1 | LAKHANOTRA JYOTSNA BHIMABHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI SNEHABEN CHEMASINGBHAI | NSM, VYARA |

### LONG JUMP M

| | | |
|---|---|---|
| 1 | PANDYA MEHUL NARESHBHAI | SVSM, SOLA |
| 2 | TRIVEDI HARSHAD BIPINBHAI | SAVSM, DHORIVAV |
| 3 | PANDYA RAVI B | DSM, CHARODI |

### LONG JUMP F

| | | |
|---|---|---|
| 1 | LAKHANOTRA JYOTSNA BHIMABHAI | SSSU- VERAVAL |
| 2 | CHAUDHARI SNEHABEN CHEMASINGBHAI | NSM, VYARA |

### BADMINTAN SINGLE M

| | | |
|---|---|---|
| 1 | JOSHI DHRUVIN HASMUKHBHAI | SSSU- VERAVAL |
| 2 | JANI SAGAR M | SBVSSM (B.ED.),SOLA |
| 3 | JOSHI SUNIL DURGA SHANKARJI | SASM, AMBAJI |

### BADMINTAN SINGLE F

| | | |
|---|---|---|
| 1 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |
| 2 | GAMIT ANKITABEN RAJESHBHAI | NSM, VYARA |

### BADMINTAN DOUBLE M

| | | |
|---|---|---|
| 1 | DHATURIYA HITESH MADHUKARBHAI | SSSU- VERAVAL |
| | JOSHI DHRUVIN HASMUKHBHAI | SSSU- VERAVAL |
| 2 | RAVAL BHARGAV J | SBSM, NADIYAD |
| | DAVE ANAND N | SBSM, NADIYAD |
| 3 | PURANI JIGNESH VIPULBHAI | SASM, AMBAJI |
| | JOSHI SUNIL DURGA SHANKARJI | SASM, AMBAJI |

### BADMINTAN DOUBLE F

| | | |
|---|---|---|
| 1 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |
| | GAMIT POOJABEN RINESHBHAI | SSSU- VERAVAL |
| 2 | GAMIT PRATIKSHABEN INTABHAI | NSM, VYARA |
| | GAMIT ANKITABEN RAJESHBHAI | NSM, VYARA |

### KABADDI


| | |
|---|---|
| 1 | DARSHANAM SANSKRIT MAHAVIDHYALAY CHARODI |
| 2 | SSSU- VERAVAL |
| 3 | SHREE AMBIKA SANSKRIT MAHAVIDHYALAYA, AMBAJI |


### AASHU CHITRAM

| | | |
|---|---|---|
| 1 | DHOLA TARUN DINESHBHAI | BAPSSSM, SARANGPUR |
| 2 | GAMIT SHRADDHA KISHORBHAI | SSSU- VERAVAL |
| 3 | JANI MAYUR RAJESHBHAI | SBVSSM (B.ED.),SOLA |

### CARTOON PAINTING

| | | |
|---|---|---|
| 1 | UPADHYAY SURYAKANT RAGHAVENDRA | SNSM, PETLAD |
| 2 | DAVE KRUTARTH RAXESHKUMAR | SNSVP, BHARUCH |
| 3 | GAMIT SHRADDHA KISHORBHAI | SSSU- VERAVAL |



### RANGOLI

| | | |
|---|---|---|
| 1 | MAHETA KIRANKUMAR ASHOKBHAI | SBVSSM (B.ED.),SOLA |
| 2 | PANDYA JAYDEV B | SSSM, ADALAJ |
| 3 | BHINDE DEVANSHI SHAILESH | SSSU- VERAVAL |

### EKAKI SASTRIYA SONG

| | | |
|---|---|---|
| 1 | JOSHI AKASH ATULBHAI | SVSM, SOLA |
| 2 | JOSHI MAYUR KISHORBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDYA DHRUMIL N | SBSM, NADIYAD |

### EKAKI SANSKRIT SONG

| | | |
|---|---|---|
| 1 | JOSHI AKASH ATULBHAI | SVSM, SOLA |
| 2 | UPADHYAY NISARG M | SBSM, NADIYAD |
| 3 | JOSHI NIKHIL ASHOKBHAI | SVSM, SOLA |

### SHUBHASHIT KANTH PATH

| | | |
|---|---|---|
| 1 | PANDYA HARDIK B | DSM, CHARODI |
| 2 | VYAS MANAV VIPULBHAI | SNSVP, BHARUCH |
| 3 | JHA MRITYUNJAY UDAYKANT | V.T. CHOKSI SM, SURAT |

### EK PATRA ABHINAY

| | | |
|---|---|---|
| 1 | JOSHI PRAFUL KANTIBHAI | SSSU- VERAVAL |
| 2 | SEVAK DIPAK UMESHBHAI | SVSM, SOLA |
| 3 | PUROHIT AKASH PRAVINBHAI | SBVSSM (B.ED.),SOLA |

### GROUP DANCE

| | |
|---|---|
| 1 | SHREE NARAYAN SASKRIT MAHAVIDHYALAY, PETLAD |
| 2 | SSSU. VERAVAL |
| 3 | NAVJAGRUTI SANSKRIT MAHAVIDHYALAY, VYARA |

### SASTRIYA NRUTYA

| | | |
|---|---|---|
| 1 | JOSHI SANJAY MAHESHBHAI | SBVSSM (B.ED.),SOLA |
| 2 | PANDYA JAY JANAK | SVSM, SOLA |
| 3 | CHAUDHARI SANDHYAKUMARI KOTLABHAI | SSSU- VERAVAL |

### SASTRIYA VADAN

| | | |
|---|---|---|
| 1 | PANDIT PARTH NARESHBHAI | SVSM, SOLA |
| 2 | UPADHYAY NIKHIL BHARATBHAI | SSRSM, AHMEDABAD |
| 3 | BIJALWAN SANDEEP | SMSM, MAGOD |





### QUIZ

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| | JOSHI TUSHAR KANAIYALAL | SVSM, SOLA |
| 2 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |
| | PANDYA NANDAN ASHVINBHAI | SSSU- VERAVAL |
| 3 | BORISHAGAR RAHUL RAMESHBHAI | SBVSSM (B.ED.),SOLA |
| | VYASH RUSHI NILESHBHAI | SBVSSM (B.ED.),SOLA |

### AASHU BHASHANAM

| | | |
|---|---|---|
| 1 | VALANGAR HARDIKKUMAR BHARATBHAI | SVSM, SOLA |
| 2 | JOSHI HARESH DHANJIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | KHANDEKA DHAVAL A | SNSM, PETLAD |



### VADVIVAD PAKSHA

| | | |
|---|---|---|
| 1 | SADHU CHETANKUMAR JANAKKUMAR | SBVSSM (B.ED.),SOLA |
| 2 | BHATT SAURABHKUMAR J | SVSM, SOLA |
| 3 | TERAIYA SAGAR HASMUKHBHAI | DSM, CHARODI |

### VADVIVAD VIPAKSHA

| | | |
|---|---|---|
| 1 | JANI RAVI DEVSHANKARBHAI | DSM, CHARODI |
| 2 | JOSHI HARESH DHANJIBHAI | SBVSSM (B.ED.),SOLA |
| 3 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |

### SAHITYA RACHNA

| | | |
|---|---|---|
| 1 | THAKAR RAJESHKUMAR GOVINDBHAI | SVSM, SOLA |
| 2 | PANDEY ARUNKUMAR DEVANAND | SSSU- VERAVAL |
| 3 | JOSHI TUSHAR KANAIYALAL | SVSM, SOLA |

### VOLLY-BOL

| | |
|---|---|
| 1 | SAVSM, DHORIVAV |
| 2 | SBVSSM (B.ED.),SOLA |
| 3 | SSSU- VERAVAL |








## महात्मनः गान्धिवर्यस्य १५० तमी जन्मजयन्ती



परिसरे स्वच्छताभियानरताः परिसरीयाः छात्राः

भारतसर्वकारस्य आदेशानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे ०२.१०.२०१८ दिनाङ्के महात्मनः गान्धिवर्यस्य १५० जन्मजयन्त्युत्सवदिवसस्य समाचरणम् अभवत्। प्रातः सप्तवादनात् अष्टवादनं यावत् विश्वविद्यालयस्य आचार्याः अधिकारिणः कर्मचारिणः छात्राश्च विभिन्नसूत्रोच्चारणेन जयघोषेण च एकस्यां सामूहिकशोभायात्रायां समन्विताः अभूवन्। तदनु ''अस्माकं भारतं स्वच्छं भारतम्'' इति लक्ष्यम् उररीकृत्य स्वेच्छया सर्वे आचार्याः अधिकारिणः छात्राश्च विश्वविद्यालयपरिसरस्य स्वच्छतां समपादयन्। सन्दर्भेऽस्मिन् प्रो. अर्चनादुबे सर्वधर्मप्रार्थनां प्रास्तौत्। अथ डॉ. दीपेशकतिरा महात्मनः गान्धिवर्यस्य जीवनसम्बन्धिप्रसङ्गान् श्रावयित्वा तस्य जीवनं अहिंसा-सत्य-सत्याग्रहादिपालनविषये कथम् अस्मान् प्रेरयति इति विषये उपस्थितान् सर्वान् अबोधयत्। विश्वविद्यालयच्छात्रैः ''रघुपति राघव राजा राम'', ''साबरमती के सन्त'', ''वैष्णव जन तो तेने कहिये'' इत्यादिगीतानि अपि अगीयन्त। अस्मिन् कार्यक्रमे प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. महेन्द्रकुमार दवे, डॉ. उपकुलसचिवः डॉ. दशरथजादवः, परीक्षाधिकारी डॉ. योगेशपटेलः, डॉ. रमेशचन्द्रशुक्लादयः अध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

## सम्पन्ना एकदिवसीया राष्ट्रियसंस्कृतसङ्गोष्ठी



सङ्गोष्ठ्यां भाषमाणाः प्रो. मिथिलाप्रसादत्रिपाठिवर्याः

संस्कृत-साहित्य-अकादमी गान्धिनगरं तथा च गुजरातविश्वविद्यालयस्य संस्कृतविभागः इत्यनयोः संयुक्तोपक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालये ०९.१२.२०१८ तमे दिनाङ्के 'संस्कृत-भाषा शिक्षण की वर्तमान समय में प्रासंगिकता' इत्यस्मिन् विषये एकदिवसीया राष्ट्रियसंस्कृतसङ्गोष्ठी आयोजिता। सङ्गोष्ठ्याम् अस्यां मुख्यवक्तृरूपेण राष्ट्रपतिपुरस्कृताः उज्जयनीस्थ-कालिदास-अकादम्याः अध्यक्षचराः महर्षिपाणिनि-संस्कृतवैदिक-विश्वविद्यालयस्य कुलपतिचराः प्रो. मिथिलाप्रसादत्रिपाठिवर्याः आसन्। वैदिकमङ्गलाचरणेन दीपप्रज्वालनेन च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याणां प्रो. गोपबन्धुमिश्रमहाभागानाम् आध्यक्षे इयं सङ्गोष्ठी समुद्घाटि। अस्याः सङ्गोष्ठ्याः स्थानीयसंयोजकेन डॉ. जानकीशरण आचार्येण उपस्थितानां विदुषां स्वागतं किञ्च डॉ. दीपेशकतिरामहोदयेन अस्याः सङ्गोष्ठ्याः प्रास्ताविकं प्रास्तावि। अस्यां सङ्गोष्ठ्यां वेदविभागाध्यक्षाः प्रो. देवेन्द्रनाथपाण्डेयवर्याः, प्राचार्याः डॉ. नरेन्द्रकुमार एल पण्ड्यावर्याः, वेरावलनगरस्य संस्कृतानुरागिणः, बहिष्ठात् आगताः अतिथयः छात्राश्च उपस्थिताः आसन्। स्वीयोद्बोधने प्रो. मिथिलाप्रसादत्रिपाठिनः अवोचन् यत् आधुनिके युगेऽपि संस्कृतम् अत्यन्तं महत्त्वपूर्णं स्थानं भजते। प्रो. त्रिपाठिवर्यैः उपस्थितानां संस्कृतानुरागिणां प्रश्नानां स्वीयेन व्याख्यानेन समाधानं व्यधायि। अन्ते प्रो. देवेन्द्रनाथपाण्डेयवर्याः उपस्थितान् विदुषः प्रति धन्यवादवचांसि प्राचीकटन्। अस्याः सङ्गोष्ठ्याः सञ्चालनं सङ्गोष्ठ्याः स्थानीयसंयोजकः डॉ. जानकीशरण आचार्यः अकरोत्।

## राष्ट्रियैक्यदिवसः समाचरितः विश्वविद्यालये



राष्ट्रियैकताये कृतसङ्कल्पाः विश्वविद्यालयस्य सर्वेऽपि शिक्षकाः कर्मचारिणश्च

३१ ऑक्टोबर लोहपुरुषस्य सरदारवल्लभभाईपटेलवर्यस्य जन्मदिवसः वर्तते। अस्य महोदयस्य जन्मदिनं राष्ट्रियैक्यदिवसरूपेण आचरणीयमिति भारतसर्वकारशासनादेशो विद्यते। तदङ्गतया विश्वविद्यालयेऽस्मिन् ३० ऑक्टोबर २०१८ तमे दिनाङ्के सरदारपटेलस्य देशभक्त्याः राष्ट्रियैक्यकार्याणां च संस्मरणाय वैविध्यपूर्णस्य राष्ट्रियैक्यदिवसस्य आयोजनमभूत्। अस्मिन्नवसरे डॉ. डी.एम. मोकरिया महोदयः सरदारवल्लभभाईपटेलवर्यस्य जीवनचरित्र-विषयकं विशिष्टमेकं प्रेरकं व्याख्यानं प्रास्तौत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य शैक्षिकप्रमुखाः, आचार्याः, अधिकारिणः, कर्मचारिणः छात्राश्च सोत्साहम् अन्वतिष्ठन्। तत्कालीनकार्यकारिकुलसचिवः प्रो. महेन्द्रकुमारदवे कार्यक्रमस्यास्य आध्यक्ष्यं निरवहत्। कार्यक्रमस्य सञ्चालनं डॉ. जयेशमुंगरा अकरोत्।

## डॉ. दशरथ जादवः कार्यकारिकुलसचिवत्वेन नियुक्तः

श्रीसोमनाथसंस्कृतविश्वविद्यालये उपकुलसचिवत्वेन कार्यं कुर्वाणः डॉ. दशरथजादवमहोदयः २९.११.२०१८ तमे दिनाङ्के यथाविधि श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य कार्यकारिकुलसचिवत्वेन कार्यभारम् अगृह्णात्। सर्वेऽपि विश्वविद्यालयपरिवारसदस्याः अमुं महोदयम् अभिनन्दनवचांसि समार्पयन्। महोदयस्य कुलसचिवत्वेन कार्यकाले विश्वविद्यालयोऽयं नूतनाः उपलब्धीः प्राप्नोतु इति कामयते विश्वविद्यालयपरिवारः।



कार्यकारिकुलसचिवस्य स्वागतं कुर्वन्तः कुलपतयः प्रो. गोपबन्धुमिश्रमहाभागाः



## राज्यस्तरीयशास्त्रीयस्पर्धायां विजेतारः विश्वविद्यालयच्छात्राः

राष्ट्रियसंस्कृतसंस्थानेन अधीतविद्यायाः दृढीकरणाय शास्त्रसंरक्षणार्थं च प्रतिवर्षम् अखिलभारतीयशास्त्रीयस्पर्धा भारतस्तरे आयोज्यते। तदङ्गतया गुजरातराज्यस्य राज्यस्तरीयशास्त्रीयस्पर्धा श्रीवरतन्तुसंस्कृतमहाविद्यालये २९ ऑक्टोबर तः ०१ नवम्बर २०१८ पर्यन्तं समायोजिता आसीत् यत्र समग्रगुजरातराज्यस्य विभिन्नमहाविद्यालयेभ्यः ४०० अधिकाः प्रतिभागिनः सम्मिलिताः अभूवन् । अस्यां स्पर्धायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः न्याय-वेदान्त-पुराण-साहित्यादिविषयेषु भाषणस्पर्धाभिः सह शलाकादीतरस्पर्धासु अपि भागमगृह्णन् । एभिः छात्रैः अस्यां स्पर्धायां सम्यक् प्रदर्शनं विधाय अधोलिखितस्पर्धासु पुरस्काराः प्राप्ताः -

| | | | | |
|---|---|---|---|---|
| १. प्रणव कश्यपः | - | वेदान्तभाषणम् | - | प्रथमस्थानम् |
| २. रजनीश पाण्डेयः | - | न्यायभाषणम् | - | प्रथमस्थानम् |
| ३. जोषी ध्रुविनः | - | स्फूर्तिस्पर्धा | - | द्वितीयस्थानम् |
| | - | सांख्ययोगभाषणम् | - | तृतीयस्थानम् |
| ४. केशव पाण्डेयः | - | स्फूर्तिस्पर्धा | - | द्वितीयस्थानम् |
| ५. कृष्ण पाण्डेयः | - | वेदभाष्यभाषणम् | - | द्वितीयस्थानम् |
| ६. देरासरी ऋषभः | - | साहित्यशलाका | - | तृतीयस्थानम् |



राज्यस्तरीयशास्त्रीयस्पर्धायाः सम्पूर्तिसमारोहे मान्याः कुलपतयः प्रो. गोपबन्धुमिश्राः

अस्याः स्पर्धायाः समापनसमारोहः ०१.१२.२०१८ तमे दिनाङ्के सम्पन्नः। कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः प्रो. गोपबन्धुमिश्रवर्यः इतरे च अतिथयः विजेतृभ्यः छात्रेभ्यः पुरस्कारं व्यतन्वन्। विश्वविद्यालयच्छात्रदलस्य मार्गदर्शकत्वेन श्रीनित्यानन्द ओझा कार्यमकरोत्।

## ब्रह्मर्षिधाम्नि आयोजिता व्याकरणशास्त्रकार्यशाला



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८ तः ३०.१२.२०१८ पर्यन्तं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये ''धातूद्देश्यकाः प्रत्ययाः'' इति विषयमाश्रित्य अभिनवा एका व्याकरणकार्याशाला समायोजिता आसीत्। अस्यां विविधमहाविद्यालयेभ्यः प्रायः ६२ विद्यार्थिनः अध्ययनाय समागताः। डॉ. पुष्पादीक्षितमहोदयया स्वीयया विशिष्टया शैल्या धातूद्देश्यकाः प्रत्ययाः इति विषये नितरामध्यापनकर्म अक्रियत। उद्घाटनसत्रे ब्रह्मर्षिसंस्कृतमहाविद्यालय-नडियादप्रमुखाः पूज्याः पद्मश्रीडाह्याभाई शास्त्रिणः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्याः आचार्याः गोपबन्धुमिश्रमहाभागाः, ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यचराः डॉ. कृष्णप्रसादनिरौलाः, प्रो. वसन्तकुमारभट्टाश्च उपस्थिताः भूत्वा प्रासङ्गिकोद्बोधनम् अकार्षुः। प्रो. विनोदकुमार झा अस्याः कार्याशालायाः प्रमुखसंयोजकः, डॉ. दिपेशकतिरा च संयोजकः आस्ताम्। स्थानीयसंयोजकरूपेण श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलाल भोगायता तथा च स्थानीयसहसंयोजकः डॉ. क्षितीश्वरनाथपाण्डेयः अविद्यत।



## छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे नैकविषयेषु अभ्यासरताः विद्यार्थिनः विदुषाम् अध्यापकानां मार्गदर्शने UGC NET-JRF, GSET इत्यादिराष्ट्रस्तरीयासु विभिन्नप्रतियोगिपरीक्षासु उत्तीर्णाः अभूवन्। एतान् छात्रान् विश्वविद्यालयपरिवारः अभिनन्दति।



**भट्ट जिगर महेशभाई**
UGC NET - November-2017, July-2018, December-2018
GSET - August-2017



**अरुणकुमार पाण्डेयः**
UGC NET - July-2016, Nov.-2017, NET-JRF July-2018,
GSET - August-2017



**त्रिवेदी दिलीपः**
UGC NET - November-2017, July-2018, NET-JRF, Dec.-2018,
GSET - September-2018



**राहुलकुमार झा**
UGC NET - November-2017, July-2018, December-2018
GSET - November-2017




**भागीरथी पात्रा**
UGC NET - July-2018, December-2018



**प्रकाशरञ्जन मिश्रः**
UGC NET - July-2018
GSET - September-2018



**किञ्जल गोरफाड**
UGC NET - July-2018
GSET - September-2018



**पाढ जयः कपिलभाई**
GSET - September-2018



**आशिषकुमारमिश्रः**
खेलमहाकुम्भे-२०१८ तालुकास्तरे वॉलीबॉल-स्पर्धायां प्रथमस्थानम्। जनपदस्तरे वॉलीबॉल-स्पर्धायां तृतीयं स्थानम् अलभत। तदर्थं विश्वविद्यालयपक्षतः तस्मै वर्धापनानि वितीर्यन्ते।

## प्राध्यापकानाम् उपलब्धयो गतिविधयश्च

### प्रो. देवेन्द्रनाथ पाण्डेयः

- १८ तः २० मई २०१८ पर्यन्तं ४९तमे अखिलभारतीय-प्राच्यविद्या-सम्मेलने स्थानीयसचिवरूपेण कार्यं कृतम्।
- डॉ. बाबासाहेब-अम्बेडकर-मुक्तविश्वविद्यालये अखिलभारतीयप्राच्य-विद्यासंगोष्ठ्यां सारस्वतातिथिरूपेण विशिष्टं व्याख्यानं प्रदत्तम्।
- विश्वविद्यालयस्य संस्कृतसप्ताहोत्सवे मुख्यवक्तृरूपेण भाषणं दत्तम्।
- ''केचन वेदभाष्यकारा धर्ममनीषिणश्च'' इत्याख्यं ग्रन्थप्रकाशनं कृतम्।

### डॉ. नरेन्द्रकुमार एल्. पण्ड्या

- १.१०.२०१८ दिनाङ्के जामनगरस्थे श्रीकृष्णप्रणामिमन्दिरे प्रणामिदर्शन-विषयराष्ट्रियसंगोष्ठ्यां समुपस्थाय 'माहेश्वरतन्त्रे श्रीकृष्णोपासना' इति विषये शोधपत्रं प्रस्तुतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालय-पुराणसङ्कायस्य शास्त्रपुनश्चर्याकार्यक्रमे ब्रह्मर्षिसंस्कारधाम्नि नडियादनगरे वाल्मीकिरामायणे अयोध्याकाण्डे आमन्त्रितवक्तृरूपेण व्याख्यानं प्रदत्तम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यसङ्कायस्य २७-२९ सितम्बर २०१८ दिनाङ्केषु भरूचनगरे नर्मदासंस्कृतमहाविद्यालये समायोजिते शास्त्रपुनश्चर्याकार्यक्रमे भागं गृहीत्वा नाट्यदर्पणे प्रकरणादिरूपकविषये आमन्त्रितवक्तृरूपेण व्याख्यानं प्रदत्तम्।
- २८.१०.२०१८ दिनाङ्के नरसिंहमहेतायुनिवर्सिटी इत्यत्र संस्कृतविषये संशोधनसमित्यां RDC मध्ये सभ्यत्वेन उपस्थाय कार्यं सम्पादितम्।
- २३.१२.२०१८ दिनाङ्के वाघोडियावडोदरास्थिते श्रीगोविन्ददेवगिरि-वेदविद्यालये महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानम् उज्जयिनी इत्यस्य संयुक्तोपक्रमे समायोजितायां राष्ट्रियसंगोष्ठ्यां शुक्लयजुर्वेदे यज्ञद्वारा पर्यावरणरक्षणविषये व्याख्यानं शोधपत्रं च प्रस्तुतम्।
- २४-२५.१२.२०१८ दिनाङ्कयोः गुजराते संस्कृतभारत्या कोलवडा - गांधीनगरे समायोजिते प्रान्तीयाधिवेशने समुपस्थाय भागः गृहीतः।

### प्रो. अर्चना दुबे

- १८ तः २० मई २०१८ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजिते ४९तमे अखिल-भारतीय-प्राच्यविद्या-सम्मेलने 'उत्तररामचरिते राजधर्मः' इति विषये शोधपत्रं पठितम्।
- विश्वविद्यालयस्य वाक्यार्थपरिषदि 'उत्तररामचरिते स्त्रीधर्मः' इति विषये वाक्यार्थः प्रस्तुतः।
- २७-२९ सितम्बर २०१८ दिनाङ्केषु नर्मदासंस्कृतमहाविद्यालये साहित्य-सङ्कायस्य शास्त्रपुनश्चर्याकार्यक्रमे 'नाट्यदर्पणानुसारं वृत्तिरसविचारः' इति विषये विशिष्टं व्याख्यानं प्रदत्तम्।
- २४.१२.२०१८ तमे दिनाङ्के स्वामिगोविन्ददेवगिरिवेदविद्यालये आयोजिते वैदिकसम्मेलने 'वैदिक वाङ्मय में पर्यावरण चेतना' इति विषये व्याख्यानं प्रदत्तम्।
- ३० नवम्बर तः १ दिसम्बर २०१८ यावत् राँचीविश्वविद्यालये 'पाश्चात्य काव्यशास्त्र व संस्कृत काव्यशास्त्र में तुलना' इति विषये व्याख्यानं दत्तम्।
- 'रामायण की रमणीयता' इति पुस्तकस्य प्रकाशनम् - ISBN - 978-93-83452-60-0

### डॉ. डी. एम्. मोकरिया

- श्रीसोमनाथसंस्कृतविश्वविद्यालये १८ मई तः २० मई २०१८ पर्यन्तम् आयोजिते अखिलभारतीय-प्राच्यविद्यासम्मेलने सत्रसञ्चालनेन सह शोधपत्रं प्रस्तुतम्।
- १७.०९.२०१८ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदि शोधपत्रं प्रस्तुतम्।
- नर्मदासंस्कृतमहाविद्यालये साहित्यशास्त्रीयकार्यशालायां 'नाट्यदर्पणे नायकविचारः' इत्यस्मिन् विषये व्याख्यानं प्रदत्तम्।
- ३०.१०.२०१८ दिनाङ्के विश्वविद्यालयपरिसरे सरदारवल्लभभाईपटेल-महोदयस्य जन्मजयन्तीदिने विशिष्टं व्याख्यानं प्रदत्तम्।

### प्रो. महेन्द्रकुमार दवे

- १८ तः २० मई २०१८ पर्यन्तम् ४९तमे अखिलभारतीय-प्राच्यविद्या-सम्मेलने भागं गृहीत्वा शोधपत्रं प्रस्तुतम्।
- ऑगस्टमासे नर्मदासंस्कृतमहाविद्यालये आयोजितायाः साहित्यशास्त्रीय-कार्याशालायाः सकलं आयोजनं कृत्वा 'नाट्यं नाट्यस्वरूपम्' इति विषये शोधपत्रं प्रस्तुतम्।
- २३.१२.२०१८ दिनाङ्के वाघोडिया-वडोदरानगरे वैदिकसम्मेलने 'वेदेषु पर्यावरणम्' इति विषयं विशिष्टं व्याख्यानं प्रदत्तम्।

### डॉ. शत्रुघ्न पाणिग्राही

- १०.०८.२०१८ त १७.०८.१८ दिनाङ्कं यावत् समायोजिते संस्कृतसप्ताहोत्सवे संयोजकरूपेण निर्णायकरूपेण च योगदानम्।
- गुजरातपाठ्यपुस्तकमण्डलद्वारा आयोजिते वेदपाठ्यक्रमनिर्माणे योगदानम्।
- २९.११.२०१८ तः ०१.१२.२०१८ पर्यन्तम् उत्कलप्रदेशे पूर्वोत्तरवैदिक-सम्मेलने मुख्यवक्तृरूपेण उपस्थितिः।
- उत्कलप्रदेशे आयोजितायां राष्ट्रियसंगोष्ठ्यां मुख्यवक्तृत्वेन योगदानं एवञ्च 'मनुष्यजीवने संस्कृतसाहित्यस्य प्रयोजनम्' इति विषये व्याख्यानं प्रदत्तम्।
- 'धर्मस्वरूपविचारः' इति विषये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वाक्यार्थपरिषदि व्याख्यानं प्रस्तुतम्।
- २२.१२.१८ त २४.१२.१८ दिनाङ्कं यावत् वाघोडीयावेदविद्यालये महर्षिसान्दिपनीराष्ट्रीयवेदविद्याप्रतिष्ठानस्य सहयोगेन समायोजिते वैदिक-सम्मेलने 'वेदेषु पर्यावरणम्' इति विषये व्याख्यानं प्रदत्तम्।
- विश्वविद्यालये नेट परीक्षार्थं व्याख्यानानि प्रदत्तानि।
- 'केचन वेदभाष्यकारा धर्ममनीषिणश्च' इति पुस्तकस्य प्रकाशनम्।
- 'ऋग्वेदे मण्डल' इति शोधलेखस्य प्राचीसुधा इति शोधपत्रिकायां प्रकाशनम्।

### डॉ. रमेशचन्द्र शुक्लः

- १८ तः २० मई २०१८ पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजिते अखिलभारतीय-प्राच्यविद्याप्राच्यविद्या-सम्मेलने 'राष्ट्रे ज्योतिषशास्त्रस्य योगदानम्' इति विषये शोधपत्रं प्रस्तुतम्।
- ०४.०८.२०१८ तमे दिनाङ्के राष्ट्रिय-सेवा-योजनाविभागेन आयोजितस्य वृक्षारोपणकार्यक्रमस्य संयोजनम्।

### डॉ. दिपेश विनोद कतिरा

- श्रीसोमनाथसंस्कृतविश्वविद्यालये समायोजिते अखिलभारतीय-प्राच्यविद्या-सम्मेलने 'व्याकरणे विनूतनोदाहरणानि' विषये शोधपत्रं पठितम्।
- २९-३० नवेम्बर २०१८ दिनाङ्कयोः राष्ट्रियसंस्कृतसंस्थानस्य मुंम्बई परिसरे वाक्यपदीयविषयकसङ्गोष्ठ्यां 'भावपदार्थविमर्शः' विषये शोधपत्रं पठितम्।
- १-२ डिसेम्बर २०१८ दिनाङ्कयोः भारतीयदूतावासः IHCS इत्येताभ्यां संस्थाभ्याम् ईरानदेशे Linguistic Links between Sanskrit & Persian with Special Reference to Panini इत्येतस्मिन् विषये आयोजितायाम् उभयराष्ट्रियसङ्गोष्ठ्यां 'लृवर्णविमर्शः' विषये शोधपत्रं प्रस्तुतम्।
- संस्कृतभारत्या 'पत्राचारद्वारा संस्कृतशिक्षणम्' इति योजनायां प्रथमभागस्य नवम-पाठस्य विडियो सज्जीकृतम्। कार्यमिदं संस्कृतभारत्याः गुजरातविभागः डॉ. बाबा साहेब- अंबेडकर-मुक्तविश्वविद्यालयः चेत्यनयोः संस्थयोः पत्राचारद्वारा संस्कृतशिक्षणयोजनायाः विडियो-पाठनिर्माणस्य संयुक्तप्रकल्पस्य अङ्गतया प्रावर्तत।

### डॉ. जानकीशरण आचार्यः

- श्रीसोमनाथसंस्कृतविश्वविद्यालये १८ तः २० मई २०१८ पर्यन्तम् आयोजितस्य अखिल-भारतीय-प्राच्यविद्या-सम्मेलनस्य (49th AIOC) अतिरिक्तस्थानीयसचिवत्वेन उत्तरदायित्वस्य निर्वहनं किञ्च तत्र दर्शनशास्त्रे शोधपत्रं पठितम्।
- ११.०६.२०१८ दिनाङ्के गान्धिनगरस्थ-आर्ष-अक्षरधाम संशोधनकेन्द्रेण आयोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां 'स्वामिनारायणसिद्धान्तसुधा अक्षरधारा' इति विषये शोधपत्रवाचनम् अपि च एकस्मिन् सत्रे सत्राध्यक्षरूपेण उपस्थितिः।
- १०.०७.२०१८ दिनाङ्के 'गुजरात-शाला-पाठ्यपुस्तकमण्डलम्' इति नडियादस्थ-ब्रह्मर्षिसंस्कृतमहाविद्यालये आयोजितायां पाठलेखन-कार्यशालायां मध्यमावर्गस्य पाठलेखने भागग्रहणं कृत्वा तदनु आयोजितासु पाठलेखनकार्यशालासु गत्वा सांख्यकारिकाविषये पञ्च पाठाः लिखिताः।
- ०६ तः ०८ ऑक्टोबर २०१८ पर्यन्तं विश्वविद्यालयेन आयोजिते द्वादशे युवमहोत्सवे (12th Youth Festival) संयोजकत्वेन कार्यं सम्पादितम्।
- २७-२८ ऑक्टोबर २०१८ तमयोः दिनाङ्कयोः अनन्ताचार्य-भारतीयविद्या-अनुसन्धान-केन्द्रम्, मुम्बै इति संस्थया आयोजिते द्विदिवसीये राष्ट्रियसम्मेलने विशिष्टवक्तृरूपेण उपस्थाय ''पुराणेषु प्रभासतीर्थम्'' इति विषये विशिष्टं व्याख्यानं प्रदत्तम्।
- २९-३० नवम्बर २०१८ इति दिनाङ्कयोः अहमदाबादस्थ-श्रीवरन्तु-संस्कृतमहाविद्यालये आयोजितायां गुजरातराज्य-शास्त्रीयस्पर्धायां विभिन्नस्पर्धासु निर्णायकरूपेण उपस्थितिः।
- गुजरात-साहित्य-अकादम्याः एवं गुजरातविश्वविद्यालयस्य सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालये ०९.१२.२०१८ दिनाङ्के आयोजिते एकदिवसीयराष्ट्रियपरिसंवादे स्थानीयसंयोजकत्वेन कार्यं कृतम्।
- २२-२३-२४ डिसेम्बर् २०१८ तमदिनाङ्केषु महर्षिसान्दीपनिराष्ट्रिय-वेदविद्याप्रतिष्ठानं तथा च स्वामिगोविन्ददेवगिरि-वेदविद्यालये इति संस्थयोः संयुक्तोपक्रमे आयोजिते त्रिदिवसीयक्षेत्रीयवैदिकसम्मेलने सारस्वतातिथिरूपेण उपस्थाय 'पर्यावरणचिन्तनविषये वैदिकवाङ्मयम्' इति विषये व्याख्यानं प्रदत्तम्।
- २०१७-१८ तमे शैक्षिकवर्षे जून-२०१८ पर्यन्तं चन्द्रमौलिबालक-च्छात्रावासस्य अध्यक्षत्वेन (Warden) कार्यं सम्पादितम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ''सोमज्योतिः'' इति वार्तापत्रस्य १७-१८तमस्य संयुक्ताङ्कस्य सम्पादनम्।
- ISSN/ISBN पत्रिकासु प्रकाशिता विविधलेखाः पुस्तकानि च -
  - कृष्णपण्डितविरचिता ''कैवल्यदीपिका'' (प्रभाव्याख्यासहिता) - सम्पादनम् - ISBN - 978-93-83097-25-8
  - ''प्रज्ञापीयूषम्'' - Summaries of 49th AIOC Research Papers - सम्पादनम् - ISBN - 978-93-83097-28-9
  - ''भारतीयदर्शनेषु पाठलोचसमालोचनपद्धतिः'' - वाक्यार्थज्योतिः (Vol. 2) ISBN - 978-93-83097-27-2
  - ''वेदान्तदर्शने आनन्दमीमांसा'' - गुरुकुलपत्रिका (Vol.68/4 69/1) ISSN - 0976-8017

### डॉ. जयेश डी. मुंगरा

- २१.०६.२०१८ तमे दिनाङ्के विश्वयोगदिवसे संयोजकरूपेण कार्यं विहितम्।
- ०४.०८.२०१८ तमे दिनाङ्के विश्वविद्यालयपरिसरे वृक्षारोपणकार्यक्रमस्य संयोजकत्वं विहितम्।
- ११.०८.२०१८ तमे दिनाङ्के भक्तकविनरसिंहमहेताविश्वविद्यालये अन्तर्महाविद्यालयीयबैडमिंटन्-स्पर्धायां निर्णायकरूपेण उपस्थितिः तथैव १०.०९.२०१८ दिनाङ्के हेण्डबॉल-महिला-स्पर्धायामपि निर्णायकरूपेण उपस्थितिः।
- १८.०९.२०१८ दिनाङ्के विश्वविद्यालयपरिसरे थैलासेमिया-परीक्षणम् इति कार्यक्रमे संयोजककार्यं विहितं किञ्च सेप्टेम्बरमासे गुजरातसर्वकारस्य खेलमहाकुम्भे तालुकास्तरे निर्णायकत्वेन उपस्थितिः।
- ०२.१०.२०१८ दिनाङ्के महात्म-गान्धिनः १५०तम-जन्मजयन्त्यायोजने संयोजकत्वेन कार्यनिर्वहनम्।
- ६ तः ८ ऑक्टोबर २०१८ पर्यन्तं विश्वविद्यालयस्य द्वादशयुवमहोत्सवे मुख्यसंयोजकस्य दायित्वनिर्वहनम्।
- ३१.१०.२०१८ दिनाङ्के सरदारपटेलजन्मजयन्त्याख्ये कार्यक्रमे राष्ट्रियैक्यदिवसस्य संयोजकरूपेण कार्यं कृतम्।

### डॉ. बी. उमामहेश्वरी

- १८ मई तः २० मई २०१८ दिनाङ्कपर्यन्तं ४९तमे अखिल-भारतीय-प्राच्यविद्या-सम्मेलने 'प्राचीनाधुनिकपरिप्रेक्ष्येकालः एकं विशिष्टं चिन्तनम्' इति विषयमधिकृत्य स्वशोधपत्रं प्रस्तुतम्।
- गुजरातराज्यस्य शालापाठ्यपुस्तकमण्डलसमायोजिते मध्यमा कक्ष्यायाः पाठ्यपुस्तकपाठलेखने वारत्रयं गत्वा पाठलेखिकारूपेण कार्यं कृतम्।
- २२.१२.२०१८ दिनाङ्के वाघोडियानगरे स्वामिगोविन्ददेवगिरि-वेदविद्यालये आयोजिते त्रिदवसीयक्षेत्रीयवेदसम्मेलने 'निगमेषु पर्यावरणपरीशीलनम्' इति विषये सारस्वतविशेषव्याख्यातृरूपेण भागग्रहणम्।
- २९.०९.२०१८ तः ०१.१२.२०१८ पर्यन्तम् गुजरातराज्यस्तरीय-शास्त्रीयस्पर्धायां न्यायवेदान्तभाषणयोः निर्णायकरूपेण कार्यसम्पादनम्।

### रविन्द्र काले (ग्रन्थपालः)

- विश्वविद्यालयस्य द्वादशे युवमहोत्सवे संयोजकरूपेण कार्यं कृतम्।
- ३०.०७.२०१८ तः १९.०८.२०१८ पर्यन्तं UGC-HRD Center गुजरातविश्वविद्यालये पुनश्चर्यापाठ्यक्रमे भागग्रहणम्।
- २०.१२.२०१८ दिनाङ्के शिक्षाविभागेन Knowledge Consortium of Gujarat (KCG) परिसरे आयोजितायां Intellectual Property (IP) Strategy for Academia in Gujarat इति कार्यशालायां भागग्रहणम्।
- 'सोमज्योतिः' इति वार्तापत्रस्य १६-१७-१८तमाङ्कानां सम्पादनम्।

### डॉ. कार्तिक पण्ड्या (संशोधनाधिकारी)

- २४-२५ दिसम्बर २०१८ अखिलभारतीयसंस्कृत-अधिवेशन-प्रदर्शिन्यां विश्वविद्यालयस्य प्रदर्शिन्याः संयोजकत्वं विहितम्।
- २२-२३-२४ डिसेम्बर् २०१८ दिनाङ्केषु महर्षिसान्दीपनिराष्ट्रियवेद-विद्याप्रतिष्ठानं तथा च स्वामिगोविन्ददेवगिरि-संस्कृतमहाविद्यालय इति संस्थयो आयोजिते त्रिदिवसीयक्षेत्रीयवैदिकसम्मेलने Ecology in the Bhumisukta of the Atharvaveda इति विषये व्याख्यानं प्रदत्तम्।
- गुजरातराज्यस्य शालापाठ्यपुस्तकमण्डलसमायोजिते मध्यमा इति कक्ष्यायाः पाठ्यपुस्तकपाठलेखने दर्शनविषयस्य तर्कसंग्रहे पञ्च पाठाः लिखिताः।

### डॉ. योगेश पटेलः (परीक्षानियन्त्रकः)

- २६.०६.२०१८ दिनाङ्के पेसिफिक एकेडमी ऑफ हायर एज्यूकेशन एण्ड रिसर्च युनिवर्सिटी, उदयपुरतः 'Implementing and Assessing Impact of Task Based Language Teaching on ESL Learners at UG Level' इति विषये शोधप्रबन्धलेखनेन 'विद्यावारिधिः' (P.hD.) इति उपाधिं प्राप्नोत्।

गुजरातराज्ये, पुण्ये प्रभासक्षेत्रे, सोमनाथ–ज्योतिर्लिङ्ग–सान्निध्ये
संस्कृत–शास्त्र–वेद–अध्ययनस्य सुवर्णावसरः

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः

## प्रमुखाः पाठ्यक्रमाः

* शास्त्री (B. A.) * आचार्यः (M. A.) *
* तत्त्वाचार्यः (M.Phil) * विद्यावारिधिः (Ph.D.)

विषयाः– वेदः, व्याकरणम्, सर्वदर्शनम्, ज्यौतिषम्, साहित्यम्, पुराणम्, योगः(M. A.)

* पदविका (डिप्लोमा) *

**विषयाः–** टेम्पल–मेनेजमेन्ट, पौरोहित्यम्, वास्तुशास्त्रम्, ज्यौतिषम्, संस्कृत–टीचिंग, शास्त्रीयसङ्गीतम्, वैदिकगणितम्, योगः

## विशेषाः

* मुख्य–पाठ्यक्रमेण सह एव डिप्लोमापाठ्यक्रमे अपि प्रवेशः *
* राज्यस्तरीय–राष्ट्रस्तरीय–क्रीडा–स्पर्धासु भागग्रहणस्य अवसरः *
* राज्यस्तरीय–राष्ट्रस्तरीय शास्त्रीयस्पर्धासु भागग्रहणस्य अवसरः *
* NET / SLET प्रशिक्षणम् * संस्कृतसम्भाषण–प्रशिक्षणम् *
* पारम्परिकविषयैः सह आधुनिकविषयाणामपि अध्यापनम् *

## सुविधाः

* निःशुल्क–भोजन–व्यवस्था * निःशुल्क–आवास–व्यवस्था * अद्यतन–ग्रन्थालय *
* अद्यतन–सङ्गणक–प्रयोगशाला * आधुनिक–यन्त्रैः युक्ता व्यायामशाला *

## प्रवेशाय सम्पर्कं कुर्वन्तु

| डॉ. जानकीशरण आचार्यः | डॉ. दीपेश कतिरा | डॉ. शत्रुघ्न पाणिग्राही |
|---|---|---|
| ८७५८८ १७५२५ | ९५९४३ ५६८५७ | ८०००१ २४८९३ |

कार्यालयः – ०२८७६–२४४५३२
web: www.sssu.ac.in E-mail: sssu.veraval@gmail.com



